सिद्धांत
लघुकौमुदी

२०५

लघु सिद्धान्त कौमुदी
Author - वरदराजः

Fo. Set. 34

MISSING. 17-18, 20-37
Total - 20

२०४

नं. २०५६

ल. कौ. १ ॐ नमः शिवाय ॐ नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहं पाणिनीयप्रवेशाय लघु
सिद्धान्तकौमुदीं ॥ अइउण् ऋऌक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम्
झभञ् घढधष् जबगडदश् खफछठथचटतव् कपय् शषसर् हल् इति माहे
श्वराणि सूत्राण्यणादिसंज्ञार्थानि ॥ एषामन्त्या इतः । हकारादिष्वकार उच्चार
णार्थः लण्मध्ये त्वित्संज्ञकः । हलन्त्यम् । उपदेशेऽन्त्यं हलित्स्यात् उपदेश आद्योच्
चारणं सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र । अदर्शनं लोपः । प्रसक्तस्याद
र्शनं लोपसंज्ञं स्यात् तस्य लोपः तस्येतो लोपः स्यात् णादयोऽणाद्यर्थाः । आदिरन्त्ये
न सहेता । अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् यथाणिति अइउव
र्णानां संज्ञा एवमच् हल् अल् इत्यादयः । ऊकालोऽज्झ्रस्वदीर्घप्लुतः । उश्च ऊश्च
ऊ३श्च वः वां कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् स प्रत्येकमु
दात्तादिभेदेन त्रिधा । उच्चैरुदात्तः । ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽ
जुदात्तसंज्ञः स्यात् आये । नीचैरनुदात्तः । ताल्वादिषु सभागेषु स्थानेष्वधोभागे नि १
ष्पन्नोऽजनुदात्तसंज्ञः स्यात् । समाहारः स्वरितः । उदात्तानुदात्तत्ववर्णधर्मौ समा

ह्रियेतेयस्मिन्सोच् स्वरितसंज्ञःस्यात् सनवविधोपिप्रत्येकमनुनासिकाननुनासिक
त्वाभ्यांद्विधा । मुखनासिकावचनोनुनासिकः । मुखसहितनासिकयोच्चार्यमाणो
वर्णोनुनासिकसंज्ञःस्यात् तदित्थंअइउऋवर्णानांप्रत्येकमष्टादशभेदाः लृवर्णस्य
द्वादशतस्यदीर्घाभावात् एचामपिद्वादशतेषांह्रस्वाभावात् । तुल्यास्यप्रयत्नंसव
र्णं । ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयंयस्ययेनतुल्यंतन्मिथः सवर्णास्या
न् ऋलृवर्णयोर्मिथः सावर्ण्यंवाच्यं अकुहविसर्जनीयानांकंठः इचुयशानांताल
ऋटुरषाणांमूर्धा लृतुलसानांदंताः उपूपध्मानीयानामोष्ठौ ञमङणनानांनासि
काच एदैतोःकंठतालु ओदौतोःकंठोष्ठं वकारस्यदंतोष्ठं जिह्वामूलीयस्यजिह्वा
मूलं नासिकानुस्वारस्य यत्नोद्विधा आभ्यंतरोबाह्यश्च आद्यःपंचधा स्पृष्टेषत्स्पृ
ष्टेषद्विवृतविवृतसंवृतभेदात् तत्रस्पृष्टंप्रयत्नंस्पर्शानां ईषत्स्पृष्टमंतस्थानाम् ई
षद्विवृतमूष्मणां विवृतंस्वराणां ह्रस्वस्यावर्णस्यप्रयोगेसंवृतं प्रक्रियादशायां
तुविवृतमेव बाह्यप्रयत्नस्त्वेकादशधा विवारः संवारः श्वासोनादोघोषोघोषोल्पप्राणोम
हाप्राणउदात्तोनुदात्तः स्वरितश्चेति खरोविवाराः श्वासाअघोषाश्च वर्गाणांप्रथम

तृतीयपंचमा हशःसंवारानादाघोषाश्च यणश्चाल्पप्राणाः अन्येमहाप्राणाः कादयो-
मावसानाःस्पर्शाः यणोन्तस्थाः शलऊष्माणः अचःस्वराः कःखइतिकखाभ्यांप्रागर्द्ध
विसर्गसदृशोजिह्वामूलीयः पःफइति पफाभ्यांप्रागर्द्धविसर्गसदृशउपध्मानीयः अंअः
इत्यचः परावनुस्वारविसर्गौ । अनुदित्सवर्णस्यचाप्रत्ययः । अविधीयमानोणुदिच्च
सवर्णस्यसंज्ञास्यात् अत्रैवाणपरेणणकारेण कुचुटुतुपुएतेउदितः तदेवमइत्यष्टा
दशानांसंज्ञातथेकारोकारौ ऋकारस्त्रिंशतः एवंलृकारोपि एचोद्वादशानां अनुना-
सिकाननुनासिकभेदेनयवलाद्विधा तेनाननुनासिकास्तेद्वयोर्द्वयोःसंज्ञा । परःसन्निक
र्षःसंहिता । वर्णानामतिशयितःसन्निधिःसंहितासंज्ञास्यात् । हलोनंतराःसंयोगः ।
अज्भिरव्यवहिताहलःसंयोगसंज्ञाःस्युः । सुप्तिङंतंपदं । सुबंतंतिङंतंचपदसंज्ञंस्यात्
इतिसंज्ञाप्रकरणं ॐ इकोयणचि । इकःस्थानेयण्स्यादचिसंहितायां सुधीउपास्यइति
स्थिते । तस्मिन्निति निर्दिष्टेपूर्वस्य । सप्तमीनिर्देशेनविधीयमानंकार्यंवर्णांतरेणाव्यव
हितस्यपूर्वस्यबोध्यं । स्थानेंतरतमः । प्रसंगेसतिसदृशतमआदेशःस्यात् सुध्य्उपा
स्यइतिस्थिते । अनचिच । अचःपरस्ययरोद्वेवास्तोनचि । संयोगांतस्यलोपः । संयो

गोनं यत्पदं तस्य लोपः स्यात् अलोन्त्यस्य षष्ठीनिर्दिष्टस्यान्त्यस्यादेशः स्यात् इति प्राप्ते यण
प्रतिषेधो वाच्यः । कलांजशाकासि । सुद्ध्युपास्यः मद्ध्वरिः धात्रंशः लाकृतिः । एचोय
वायावः । एचः क्रमात् अय् अव् आय् आव् एते स्युरचि यथासंख्यमनुदेशः समानाम् स
मसंबंधी विधिर्यथासंख्यं स्यात् हरये विष्णवे नायकः पावकः । वांतो यि प्रत्यये । यका
दौ प्रत्यये परे ओदौतोरवावौ स्तः गव्यं नाव्यं । क्षय्यजय्यौ शक्यार्थे । यांतादेशनिपात
नार्थमिदं क्षय्यं जय्यं शक्यार्थे किं क्षेयं पापं जेयं मनः अध्वपरिमाणे च गव्यूतिः अदे
ङ्गुणः अदेङ्गुणसंज्ञः स्यात् तपरस्तत्कालस्य तपरस्तात्परो वा उच्चार्यमाणाः स
मकालस्यैव संज्ञा स्यात् मकः पूर्वपरयोर्नित्यविकृतस्य आद्गुणः अवर्णादचि पूर्वपरयोरे
को गुणादेशः स्यात्संहितायां उपेंद्रः रमेशः गंगोदकं । उपदेशोजनुनासिकाइत् । उ
पदेशोनुनासिकाः पाणिनीयाः प्रतिज्ञानुनासिक्योजित्संज्ञः स्यात् लणसूत्रस्थावर्णेन
सहोच्चार्यमाणो रेफो रलयोः संज्ञा । उरणपरः । ऋ इति त्रिंशतः संज्ञेत्युक्तं तत्स्थाने
योण स रपर एव प्रवर्तते कृष्णर्द्धिः तवल्कारः । लोपः शाकल्यस्य । अवर्णपूर्वयोः
पदांतयोर्यवयोर्लोपो वाशिपरे । पूर्वत्रासिद्धं । सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रि
पाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् हर इह हरयिह विष्ण इह विष्णविह । ह

ल॰ कौ॰ द्धिरादैच् आदैच् वृद्धिसंज्ञः स्यात् वृद्धिरेचि आदेचिपरे वृद्धिरेकादेशः स्यात् गुणापवादः
कृष्णैकत्वं गंगौघः देवैश्वर्यं कृष्णौत्कण्ठ्यं । एत्येधत्यूठ्सु । अवर्णादेजाद्योरेत्येधत्यो
रूठि च परे वृद्धिरेकादेशः स्यात् उपैति उपैधते प्रष्ठौहः एजाद्योः किं उपेतः माभवान्प्रे
दिधत् । स्वादीरेरिणोः । स्वैरं स्वैरिणी अक्षाद्दूहिन्याम् अक्षौहिणीसेना । प्रादूहोढो
ढ्येषैष्येषु । प्रौहः प्रौढः प्रौढिः प्रैषः प्रैष्यः ऋते च तृतीयासमासे अवर्णादृते परे तृ
तीयासमासे वृद्धिरेकादेशः स्यात् सुखेनऋतः सुखार्तः तृतीयेति किं परमर्तः प्रव
त्सवत्सतरकम्बलवसनार्णदशानामृणे प्रार्णं वत्सार्णं वत्सतरार्णं ऋणार्णं दश
आर्णं । उपसर्गाः क्रियायोगे । गतिश्च प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः गति
संज्ञाश्च प्र परा नि अप सम् अनु अव निर् निस् दुर् दुस् वि आङ् नि अधि अपि
अति सु उत् अभि प्रति परि उप प्रादयः भूवादयो धातवः क्रियावाचिनो भ्वादयो
धातुसंज्ञाः स्युः उपसर्गादृति धातौ अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्या
त् प्रार्च्छति उपार्च्छति एङि पररूपं आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः
स्यात् प्रेजति उपोषति । अचोन्त्यादिटि । अचांमध्ये योन्त्यः स आदिर्यस्य तट्टिसंज्ञं
स्यात् शकन्ध्वादिषु पररूपं वाच्यं तच्च टेः शकन्धुः कर्कन्धुः मनीषा पतञ्जलिः सी

3

मेतः केशवेषा सीमान्तोन्यः सारंगः पशुपक्षिणोः सारंगोन्यः आकृतिगणोयं मार्तण्डः
ओत्वोष्ठयोःसमासेवा । पररूपंवा स्थूलोतुः स्थूलौतुः बिंबोष्ठः बिंबौष्ठः समासेकिं तवौ
ष्ठः । ओमाङोश्च अवर्णादोमिआङिचपरेपररूपमेकादेशःस्यात् शिवायोंनमः शिवेहि
अकःसवर्णेदीर्घः । अकःसवर्णेऽचिपरेदीर्घएकादेशःस्यात् दैत्यारिः श्रीशः विष्णूदयः हो
ऌकारः । एङःपदान्तादति । पदान्तादेङोऽतिपरेपूर्वरूपमेकादेशःस्यात् हरेव विष्णोव
सर्वत्रविभाषागोः । लोकेवेदेचेङन्तस्य गोरतिवाप्रकृतिभावः पदान्ते गोअग्रं गोऽग्रं एङन्त
स्यकिंचित्रग्वग्रम् पदान्तेकिं गोः ङसिङसोश्च एङःङसिङसोरतिपरेपूर्वरूपमेकादेशःस्या
त् । अनेकाल्शित्सर्वस्य अनेकालादेशः शिच्चसर्वस्यस्यादितिप्राप्ते ङिच्च ङिदनेका
लप्यन्त्यस्यैवस्यात् । अवङ्स्फोटायनस्य । पदान्तेएङन्तस्यगोरवङ्वाऽचिपरे गोअग्रं गवाग्रं
पदान्तेकिं गवि इंद्रेच गोरवङ् इंद्रे च गवेन्द्रः चाद्यवादेः दूराद्धूतेच दूरात्संबोधनेवाक्य
स्यटेः प्लुतःस्यात् प्लुतप्रगृह्याअचिनित्यम् एतेचिप्रकृत्यास्युः आगच्छकृष्ण ३ अत्रगौश्च
रति । ईदूदेद्द्विवचनंप्रगृह्यं ईदूदेदन्तंद्विवचनंप्रगृह्यंस्यात् हरीएतौ विष्णूइमौ गंगेअमू ।
अदसोमात् । अस्मात्परावीदूतौप्रगृह्यौस्तः अमीईशाः रामकृष्णावमूआसाते मात्किम् अ
मुनिमात्ररूपोपकारिण्यवर्तत अमुकेत्र चादयोऽसत्वे लिंगसंख्यान्वितंद्रव्यं असत्त्वार्थाः

ल॰ रयोनिपातसंज्ञाः स्युः प्रादयः एतेपितथा । निपातएकाजनाङ् । एकोऽज्निपातआङ्वर्जः
कौ॰ प्रगृह्यः इइन्द्रः उउमेशः वाक्यस्मरणयोरङित् आएवंनुमन्यसे आएवंकिलतत् ङितन
५ प्रगृह्यः ईषदुष्णं ओष्णम् ओत् ओदन्तोनिपातः प्रगृह्यः अहोईशाः संबुद्धौशाकल्यस्येतावना
५ र्षे संबुद्धिनिमित्तकओकारोवा प्रगृह्योवैदिकेइतौपरे विष्णोइति विष्णविति मयउञोवो
वा मयः परस्यउञोवोवास्यादचि किमुउक्तं किम्वुक्तं इकोसवर्णेशाकल्यस्यह्रस्वश्च । पदा
न्ताइकोह्रस्वावास्युरसवर्णेचि ह्रस्वविधिसामर्थ्यान्नस्वरसंधिः चक्रिअत्र चक्र्यत्र पदान्ताः किं
गौर्यौ नसमासे वाप्यश्वः ऋत्यकः । ऋतिपरे पदान्ताअकःप्राग्वत् ब्रह्मऋषिः ब्रह्मर्षिः
पदान्ताः किं आर्छत् । इत्यच्संधिः स्तोःश्चुनाश्चुः । स्तोःसकारतवर्गयोः शकारचवर्गा
भ्यांयोगेशकारचवर्गौ स्तः रामश्शेते रामश्चिनोति सच्चित् शार्ङ्गिञ्जय शात् । शकारात्परस्य
स्योक्तं नतवर्गस्य विश्नः प्रश्नः ष्टुनाष्टुः स्तोःष्टुनायोगेष्टुःस्यात् रामष्षष्ठः रामष्टीकते
तट्टीका चक्रिण्ढौकसे नपदान्ताट्टोरनाम् । पदान्ताट्टवर्गात्परस्यस्तोःष्टुर्न षट्सन्तः पदान्तात्किं
ईट्टे तोः किं सर्पिष्टमं अनाम्नवतिनगरीणामितिवाच्यं षण्णां षण्णवतिः षण्णगर्यः तो ५
षि २ तवर्गस्यषकारेपरेष्टुत्वंन सन्षष्ठः झलांजशोन्ते पदान्तेझलांजशःस्युः वागीशः वि
द्रूपं । यरोनुनासिकेनुनासिकोवा । यरः पदान्तस्यानुनासिकेपरेनुनासिकोवास्यात्

पतन्कुमारिः प्रत्यये भाषायां नित्यम् तन्मात्रं चिन्मयं तोर्लि: तवर्गस्य लकारे परे परस
वर्णः तल्लयः विद्वांल्लिखति नस्यानुनासिको लकारः उदः स्थास्तम्भोः पूर्वस्य उदः परयोः
स्थास्तम्भोः पूर्वसवर्णः स्यात् तस्मादित्युत्तरस्य पंचमनिर्देशेन क्रियमाणं कार्यं वर्णान्तरे
णाव्यवहितस्य परस्य ज्ञेयं । आदेः परस्य । परस्य यद्विहितं तत्तस्यादेर्बोध्यं इति सस्य थः अ
घोषस्य महाप्राणस्य सस्य तादृश एव थकारः । झरो झरि सवर्णे ॥ हलः परस्य लोपो
वा स्यात् सवर्णे झरि उत्थिव मरिपरिकलांचरःस्युः इत्युदोदस्थानः उत्थानं उत्थानं उ
त्तंभनं उत्तंभनम् । झयो होऽन्यतरस्याम् । झयः परस्य हस्य पूर्वसवर्णो वा स्यात् संवा
रस्य नादस्य घोषस्य महाप्राणस्य हकारस्य तादृश एव वर्गचतुर्थः वागघरिः वाग्हरिः तद्धविः
तद्हविः । शश्छोटि । पदान्तात् झयः परस्य शस्य छो वा स्यादटि तच्छिवः तच्शिवः पदां
तात्किं विरूपशंतत्वंममीति वाच्यं तच्छ्लोकेन तच्श्लोकेन अमि परे किं वाक् श्च्योतति । मोऽनु
स्वारः मान्तस्य पदस्यानुस्वारः स्याद्धलि हरिं वंदे पदस्येति किं गम्यते । नश्चापदान्तस्य झ
लि । नस्य मस्य चापदान्तस्य झल्यनुस्वारः यशांसि आक्रंस्यते झलि किं मन्यते । अनुस्वा
रस्य ययि परसवर्णः शंकितः शंकितः कुंठितः शांतः गुंफितः चापदान्तस्य । पदान्तस्य
नुस्वारस्य ययि परे परसवर्णो वा स्यात् त्वंकरोषि त्वङ्करोषि संय्यंता संयन्ता संव्वत्सरः

ल॰ कौ॰ ५

संवत्सरः यँल्लोँकं यंल्लोकं अत्रानुस्वारस्यप्रदेसानुनासिकायवलाः । मोराजिसमःक्वौ ।
क्विबंतेराजतौपरेसमोमस्यमएवस्यात् सम्राट् । हेमपरेवा । मपरेहकारेपरेमस्यमोवास्या
त् किम्ह्मलयति किंह्मलयति यवलपरेयवलावेतिवक्तव्यं किँय्ह्यः किंह्यः किँव्ह्वला
यति किंह्वलयति किँल्ह्लादयति किंह्लादयति । नपरेनः । नपरेहकारेपरे मस्यनःस्या
द्वा किन्ह्नुते किंह्नुते । आद्यंतौटकितौ । टित्कितौयस्योक्तौतस्यक्रमादाद्यंतावयवौस्त
ङ्णोःकुक्टुक्शरि । वास्तः प्राङ्क्षष्ठः प्रांङ्षष्ठः सुगण्ट्षष्ठः सुगण्षष्ठः । डःसिधुट् डात्प
रस्यसस्यधुड्वास्यात् षट्त्संतः षट्संतः । नश्च । नांतात्परस्यसस्यधुड्वास्यात् सन्त्सः स
न्सः शितुक् । नस्यपदांतस्यशेपरेतुग्वास्यात् शश्छोटीतिछत्वविकल्पः पक्षेझरोझ
रीतिचलोपः संछंभुः सन्च्छंभुः सन्चशंभुः सन्शंभुः । ङमोह्रस्वादचिङमुण्नित्यं । ह्र
स्वात्परोयोङम् तदंतंयत्पदंतस्मात्परस्याचोङमुडागमःस्यात् नित्यंप्रत्यङ्ङात्मा सुगण्णी
शः सन्नच्युतः । समःसुटि । समोमस्यरुःस्यात्सुटि अत्रानुनासिकापूर्वस्यतुवा अत्ररुप्र
करणेरोः पूर्वस्यानुनासिकोवास्यात् अनुनासिकात्परोनुस्वारः । अनुनासिकंविहायरोः ५
पूर्वस्मात्परोनुस्वारागमःस्यात् । खरवसानयोर्विसर्जनीयः । खरिअवसानेचपदांतस्य
रेफस्यविसर्गः संपुंकानांसोवक्तव्यः संस्स्कर्ता संस्कर्ता । पुमःखय्यंपरे । अम्परेखयि

5

पुंसोऽम्परः पुंस्कोकिलः पुंस्कोकिलः । नश्छव्यप्रशान् । अम्परे छवि नकारान्तस्य पदा
न्तस्य रुः स्यात् न तु प्रशान्शब्दस्य विसर्जनीयस्य सः विसर्जनीयस्य सः स्यात् खरि शार्ङ्गिंश्छि
न्धि शार्ङ्गिंश्छिन्धि चक्रिंस्त्रायस्व चक्रिंस्त्रायस्व अप्रशान्किं प्रशान्तनोति पदस्येति किं
हन्ति नॄन्पे । नॄन्पस्य वा स्यात् पकारे कुप्वोः ≍क≍पौ च कवर्गे पवर्गे च विसर्जनीयस्य ≍क≍पौ स्तो
जिह्वामूलीयोपध्मानीयौ स्तः चाद्विसर्गः नॄँःपाहि नॄंःपाहि नॄँःपाहि नॄंःपाहि नॄन्पाहि । का
म्रेडिते । कान्नकारस्य रुः स्यादाम्रेडिते परे तस्य परमाम्रेडितं द्विरुक्तस्य परं रूपमाम्रेडितं
स्यात् कांस्कान् कांस्कान् छे च ह्रस्वस्य छे तुक् स्वच्छः । आङ्माङोश्च । तुक् स्यात् छे आ
च्छादयति माच्छिदत् दीर्घात् तुक् छे ह्रीच्छति म्लेच्छति । पदान्ताद्वा । दीर्घात्पदान्ताच्छे
तुग्वा लक्ष्मीच्छाया लक्ष्मीछाया । इति हल्सन्धिः । विसर्जनीयस्य सः खरि विष्णुस्त्राता
शर्परे विसर्जनीयः । शर्परे खरि विसर्गस्य विसर्गः न त्वन्यत् कः त्सरुः घनाघनः क्षोभणः
वा शरि । शरि विसर्गस्य विसर्गो वा हरिः शेते हरिश्शेते । इति विसर्गसन्धिः । सोऽजसा
सोऽचि लोपे चेत्पादपूरणे शिवस् अर्च्य इति स्थिते । ससजुषो रुः । पदान्तस्य सस्य सजुषश्च रुः
स्यात् । अतो रोरप्लुतादप्लुते अप्लुतादतः परस्य रोरुः स्यादप्लुते अति शिवोऽर्च्यः । हशि च ।
अप्लुतादतः परस्य रोरुः स्याद्धशि शिवो वन्द्यः । भोभगोअघोअपूर्वस्य योऽशि । एतत्पूर्व

स्योर्यादेशोगायिपरे देवाइह देवायिह भोस् भगोस् अघोस् इतिसांतानिपाताः तेषांरु
त्वेयत्वेचकृते । व्योर्लघुप्रयत्नतरःशाकटायनस्य । पदांतयोर्वकारयकारयोर्लघूच्चारणौवयौ
वास्तोशि यस्योच्चारणेजिह्वाग्रोपाग्रमध्यमूलानांशैथिल्यंसलघूच्चारणः । ओतोगार्ग्य
स्य । ओकारात्परस्यपदांतस्यालघुप्रयत्नस्ययस्यलोपः भोअच्युतलघुप्रयत्नपक्षे भोय
च्युत पदांतस्यकिं तोयम् । हलिसर्वेषाम् । भोभगोअघोअपूर्वस्ययस्यलोपःस्याद्धलि भो
देवाः भगोनमस्ते अघोयाहि देवानम्याः । रोसुपि । अह्नोरेफादेशोनतुसुपि अहर
हः अहर्गणः । रोरि । रेफस्यरेफेलोपः स्यात् ढ्रलोपेपूर्वस्यदीर्घोणः । ढरेफ
योर्लोपनिमित्तयोः परतःपूर्वस्याणोदीर्घः पुनारमते अणः किं तृढः वृढः मनस् रथ
इत्यत्ररुत्वेहशिचेत्युत्वेरोरीतिचलोपेप्राप्ते । विप्रतिषेधेपरंकार्यं । तुल्यबलविरो
धेपरंकार्यंस्यात् इतिलोपेप्राप्तेपूर्वत्रासिद्धमितिरोरीत्यस्यासिद्धत्वादुत्वमेव मनोरथः
एतत्तदोःसुलोपोकोरनञ्समासेहलि अककारयोरेतत्तदोर्यःसुस्तस्यलोपोहलिनंसमासेन
एषविष्णुःसशंभुः अकः किंएषकोरुद्रः अनञ्समासेकिं असःशिवः असःशिवः ह ९
किं एषोत्र सोचिलोपेचेत्पादपूरणं सइत्यस्यसोर्लोपः स्यादचि पादश्चेल्लोपेसत्येवपू
र्येत सेमामविड्ढिप्रभृतिंसैषदाशरथीरामः ॥ इतिविसर्गसंधिः ॥ ॥

ॐ अर्थवदधातुरप्रत्ययः प्रातिपदिकं ॥ धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दरूपं
प्रातिपदिकसंज्ञं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितान्तौ समासश्च तथा स्युः स्वौजसमौट्छ
ष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसांङ्योःसुप् स्वौजस् इति प्रथमा अम् औट्
शस् इति द्वितीया टाभ्याम्भिस् इति तृतीया ङेभ्याम्भ्यस् इति चतुर्थी ङसिभ्याम्भ्यस् इति
पंचमी ङसोसाम् इति षष्ठी ङ्योस्सुप् इति सप्तमी ङ्याप्प्रातिपदिकात् ङ्यन्ता
दाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः सुपः सुपस्त्रीणि त्रीणि वचनान्येकश
एकवचनद्विवचनबहुवचनसंज्ञानि स्युः द्व्येकयोर्द्विवचनैकवचने द्वित्वैकत्वयोरेते स्तः वि
रामोऽवसानं वर्णानामभावोऽवसानं स्यात् रुत्वविसर्गौ रामः सरूपाणामेकशेष एकविभ
क्तौ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते प्रथमयोः पूर्वसवर्णः अ
कः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश इति प्राप्ते नादिचि आदिचि न पूर्वसव
र्णदीर्घ एकादेशः वृद्धिरेचि रामौ बहुषु बहुवचनं चुटू प्रत्ययाद्यौ चुटू इतौ स्तः विभक्ति
श्च सुप्तिङौ विभक्तिसंज्ञौ स्तः न विभक्तौ तुस्माः विभक्तिस्थास्तवर्गसकारमकारा इतो न स्यु
रिति सस्य रुत्वम् रामः एकवचनं सम्बुद्धिः सम्बोधने प्रथमाया एकवचनं सम्बुद्धिः यस्मात्
प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गं यः प्रत्ययो यस्मात्क्रियते तदादि शब्दरूपं तस्मिन्नङ्गं स्यात् ए

ल॰ कौ॰ ८

ह्रस्वात्संबुद्धेः एङन्ताद्ध्रस्वान्ताच्चांगाद्धल्लुप्यते संबुद्धिश्चेत् हे राम हे रामौ हे रामाः अमि पू
र्वः अकोम्यचि परतः पूर्वरूपमेकादेशः रामं रामौ लशक्वतद्धिते तद्धितवर्जप्रत्ययाद्
या लशकवर्गा इतः स्युः तस्माच्छसो नः पुंसि पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः
स्यात्पुंसि रषाभ्यां नो णः समानपदे अट्कुप्वाङ्नुम्व्यवायेपि अट्कवर्गपवर्गाङ्नुम्भिरेतैर्व्यस्तैर्य
थासंभवं मिलितैश्च व्यवधानेपि रषाभ्यां परस्य नस्य णः स्यादिति शेषः पदान्तस्य नस्य
णो न रामान् टाङसिङसामिनात्स्याः अदन्ताट्टादीनामिनादयः स्युः णत्वं रामेण सुपि
च यञादौ सुप्यतोङ्गस्य दीर्घः रामाभ्यां अतो भिस ऐस् अकारान्तादङ्गाद्भिस ऐस् स्यात्
अनेकाल्शित्सर्वस्य रामैः ङेर्यः अतोङ्गात्परस्य ङेर्यादेशः स्थानिवदादेशोनल्विधौ
आदेशः स्थानिवत्स्यात् न त्वलाश्रयविधौ वर्णमात्राश्रितो विधिरल्विधिरिति स्थानि
वत्वात्सुपि चेति दीर्घः रामाय रामाभ्यां बहुवचने झल्येत् झलादौ बहुवचने सुप्यतों
गस्यैकारः रामेभ्यः वावसाने अवसाने झलां चरो वा स्युः रामात् रामाद् रामाभ्यां रा
मेभ्यः रामस्य ओसि च अतोङ्गस्यैकारः रामयोः ह्रस्वनद्यापो नुट् ह्रस्वान्तान्नद्यन्तादाब
न्तात्परस्यामो नुडागमः स्यात् नामि अजन्ताङ्गस्य दीर्घः स्यान्नामि रामाणां रामे रामयोः
पदेऽन्ते आदेशप्रत्यययोः इण्कवर्गाभ्यां परस्यापदान्तस्यादेशस्य प्रत्ययावयव ८

वस्यसस्यसर्थन्यादेशः स्यात् ईषद्ध्वनस्यसस्यनाहृष्यापवादः गणेषु पर्वक्रमस्तुकैयटादयः
सर्वादीनिसर्वनामानि सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्वनेम
सम सिम पूर्वपराऽवरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् स्वमज्ञातिधनाख्या
यां अन्तरंबहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एकद्वियुष्मद् अस्म
द् भवतु किं नमःशी अदन्तात्सर्वनाम्नो जसः शी अनेकाल्त्वात्सर्वादेशस्तस्य सर्वे सर्वना
म्नः स्मै अतः सर्वनाम्नो ङेः स्मै सर्वस्मै ङसिङ्योः स्मात्स्मिनौ अतः सर्वनाम्नः एतयोरेतौ स्तः
सर्वस्मात् आमि सर्वनाम्नः सुट् अवर्णान्तसर्वनाम्नो विहितस्यामः सुडागमः स्यात् एत्वे
कृते सर्वेषां सर्वस्मिन् शेषं रामवत् विश्वं विश्वास्येणोपदेशः उभशब्दो नित्यं द्विवचनान्तः
उभौ २ उभाभ्यां ३ उभयोः २ तस्येह पाठो नकर्तव्यः डतरडतमौ प्रत्ययौ प्रत्ययग्रहणे तद
न्तग्रहणमितितदन्तग्रहः नेमशब्दोऽर्धे समःसर्वपर्यायः तुल्यपर्यायस्तुनेह शब्दस्तेसमानामि
ति ज्ञापकात् पूर्वापरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायामसंज्ञायां एषां
व्यवस्थायामसंज्ञायां सर्वनामसंज्ञागणपाठात्सर्वत्र या प्राप्ता सा जसि वा पूर्वे पूर्वाः
स्वाभिधेयापेक्षोऽवधिनियमो व्यवस्था व्यवस्थायां किं दक्षिणागाथकाः कुशला इत्यर्थः अ
संज्ञायां किं उत्तराः कुरवः स्वमज्ञातिधनाख्यायाम् ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्रा

कौ० ल० ८ 8

याः संज्ञा जसि वा स्वे स्वाः आत्मीयाः आत्मनो वेत्यर्थः ज्ञातिधनवाचिनस्तु स्वाः ज्ञातयोऽर्था वा
अन्तरं बहिर्योगोपसंव्यानयोः बाह्यपरिधानीयवाचिनोऽन्तरशब्दस्य प्राग्वत्संज्ञा जसि वा अन्तरे अ-
न्तराः वा गृहाः बाह्या इत्यर्थः अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः पूर्वादिभ्यो न-
वभ्यो वा एभ्यो ङसिङ्योः स्मात्स्मिनौ स्तो वा पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे एवं पूर्वादीना-
मपि शेषं सर्ववत् तीयस्य ङित्सु वा द्वितीयस्मै द्वितीयायेत्यादि एवं तृतीयः निर्जरः ज-
राया जरसन्यतरस्याम् जराया जरस् स्यादजादौ विभक्तौ पदाङ्गाधिकारे तस्य तदन्तस्य च ग्रहणं
निर्दिश्यमानस्यादेशा भवन्ति निर्जरसौ निर्जरस इत्यादि पक्षे हलादौ च रामवत् विश्वपाः
सुडनपुंसकस्य स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य स्वादिषु सर्वनाम-
स्थानेषु परेषु पूर्वं पदसंज्ञं स्यात् यचि भं यकारादिष्वजादिषु स्वादिष्वसर्वनामस्थानेषु परतः
पूर्वं भसंज्ञं स्यात् आकडारादेका संज्ञा इतऊर्ध्वं कडाराः कर्मधारय इत्यर्थः प्रागेकस्यैकैव सं-
ज्ञेया या पराऽनवकाशा च आतो धातोः आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः
अलोऽन्त्यस्य विश्वपः विश्वपाभ्यामित्यादि एवं शङ्खध्मादयः धातोर्हाहान् हरिः हरी
जसि च ह्रस्वान्तस्याङ्गस्य गुणः ह्रस्वः ह्रस्वस्य गुणः सम्बुद्धौ हे हरे हरिं हरी हरीन् शेषो घ्यसखि
साति शेष इति स्पष्टार्थम् ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् आङो नाऽस्त्रियाम् ८

हेःपरस्यांगोनास्यारश्छियां श्राड्डिनिञासंत्ताहरिणा हरिभ्याम् हरिभिः हेतिति विसंत्त
कस्याङितिस्वेतिगुणःस्यात् हरये हरिभ्यां गुणोङ्कते ङसिङसोश्च ओदेतोङसिङसोरतिहू
वेरूपमेकादेशः हरेः हर्योः हरीणां अच्छुचे इदुद्भ्यामुत्तरस्यङेरौत्वेचवत् हरौ हरिषु एवंक
व्यादयः अन्नेो साख्युरंगस्यानङादेशोसंबुद्धौसौ अनेोन्तस्यात्सर्वउपधया सर्वनामस्थानेचासं
बुद्धौ नांतस्योपधायादीर्घोसंबुद्धः सर्वनामस्थाने अपृक्तएकाल्प्रत्ययः हस्याभ्योदीर्घोत्स्ह
तिस्यपृक्तंहल् हलंतात्परंसीतीयोन्त्योपो नलेतस्यापरंहतिसीतेनन्दमुक्तंहल्लुप्यते प्रत्यय
लोपेप्रत्ययलक्षणं प्रत्ययेलुप्तेपितदाश्रितंकार्यंस्यात् सावोसख्युरसंबुद्धौ सख्युरंगात्परं
संबुद्धिवर्जंसर्वनामस्थानंणिद्वत् अचोञ्णिति अनेनस्याङगस्योवृद्धिःञ्णितिणिति सखायौ
सखायः हेसखे सखायं सखीन् सख्या सख्ये । ख्यत्यात्परस्य ख्यितिशब्दाभ्यांखीतीशुभ्वा
भ्यांकृतयणादेशाभ्यांपरस्यङसिङसोरुतःस्यात् सख्युः ओत् इदुतःपरस्यपौत्वं सख्यौ शेषंह
रिवत् पतिःसमासएव घिसंज्ञः पत्यापत्येपत्युः २ पत्यौ शेषंहरिवत् समासेतुभूपतये
कतिबहुवचनांतः किमादिभ्योडतिप्रत्ययः बहुगणवतुडतिसंख्या डतिच डत्यंतासंख्याष
ट्संज्ञास्यात् षड्भ्योलुक् जश्शसोः प्रत्ययस्यलुक्श्लुलुपः लुकश्लुलुप शब्देरुक्तंप्रत्ययाद
र्शनंक्रमादेतन्नसंज्ञंस्यात् नसिचेतिगुणोऽयामेलनमतांगस्य लुमताशब्देनलुप्तेतन्निमित्तमं

णकार्यं स्यात्। कति २ कतिभिः कतिभ्यः कतीनां कतिषु युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः त्रि
शब्दो नित्यं बहुवचनान्तः त्रयः त्रीन् त्रिभिः त्रिभ्यः २ त्रेस्त्रयः आमि त्रयाणां त्रिषु गौणत्वे
पि प्रियत्रयाणां त्यदादीनामः एषामः स्याद्विभक्तौ द्विपर्यन्तानामेवेष्टिः द्वौ द्वाभ्यां द्वयोः
पातिलोकानिति पपीः सूर्यः पपीः पप्यौ पप्यः पपीम् पप्यौ पप्यन् पप्या पपीभ्यां प-
पीभिः पप्ये पपीभ्यां पपीभ्यः पप्यः पपीभ्यां पपीभ्यः पप्यः पप्योः पप्यां पपी पप्योः
पपीषु बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी । यूस्त्र्याख्यौ नदी । ईदूतौ नित्यस्त्रीलिङ्गौ नदीसं
ज्ञौ स्तः प्रथमलिङ्गग्रहणं च पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः अम्बार्थनद्योर्ह्रस्व
सम्बुद्धौ हे बहुश्रेयसि आण्नद्याः नद्यन्तात्परेषां ङितामाडागमः स्यात् आटश्च आटोऽचि परे वृद्धि
रेकादेशः स्यात् बहुश्रेयस्यै बहुश्रेयस्याः २ बहुश्रेयसीनां ङेराम्नद्याम्नीभ्यः आबन्तान्न
द्यन्तान्नीशब्दाच्चोत्तरस्य ङेराम् स्यात् बहुश्रेयस्यां शेषं पपीवत् अतिलक्ष्मीः शेषं बहुश्रेयसी
वत् प्रधीः अचि श्नुधातुभ्रुवां य्वोरियङुवङौ श्नुप्रत्ययान्तस्य धातोरिवर्णोवर्णान्तस्य भ्रू इत्ये
तस्य चेयङुवङौ स्तः अजादौ प्रत्यये इति प्राप्ते एरनेकाचोऽसंयोगपूर्वस्य धात्ववयवसंयोगपूर्वो
न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् अजादौ प्रत्यये परे प्रध्यौ प्र
ध्यं प्रध्यः प्रध्यि शेषं पपीवत् एवं ग्रामणीः ङौ तु ग्रामण्यां गतिकारकेतरपूर्वपदस्य

योऽनच्यते सुध्युपियौ न भूसुधियोः एतयोरविद्यमानियणस्यात् सुधीः सुधियौ सुधिय इत्यादि
सुखमिच्छतीति सुखीः सुख्युः २ सुतमिच्छतीति सुतीः सुत्युः २ शेषं प्रधीवत् शुष्कीरिवत्
एवं भानादयः तृज्वत्क्रोष्टुः असंबुद्धौ सर्वनामस्थाने क्रोष्टुरित्यस्य क्रोष्टृशब्दोऽयं ऋतो ङिस
र्वनामस्थानयोः ऋतोऽङस्य गुणः ङौ सर्वनामस्थाने चेति प्राप्ते ऋदुशनस्पुरुदंसोनेहसां च ऋ
दन्तानामुशनसादीनां चानङ् स्यात् असंबुद्धौ सौ परे अप्तृन्तृच् स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्र
शास्तॄणाम् एषामुपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने ऋकारस्य गुणः रेफः क्रोष्टा क्रोष्टा
क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रोष्टून् विभाषा तृतीयादिष्वचि अजादिषु तृतीयादिषु
क्रोष्टुर्वा तृज्वत् क्रोष्ट्रा क्रोष्टुना क्रोष्ट्रे ऋत उत् ऋदन्तात् ङसिङसोः परे उकार एकादेशः
स्यात् रपरत्वं रात्सस्य रेफात्संयोगान्तस्य सस्य लोपो नान्यस्य क्रोष्टुः २ क्रोष्ट्रोः २ क्रोष्ट्रोः क्रो
ष्टूः नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन क्रोष्टूनाम् क्रोष्टरि क्रोष्टौ क्रोष्टुषु एवं हलादौ
शंभुवत् हूहूः हूह्वौ इत्यादि अतिचमूशब्दे तु नदीकार्यं विशेषः अतिचमूः हे अतिचमु अतिच
म्वौ अतिचम्वः अतिचम्वं अतिचमून् खलपूः ओः सुपि धात्ववयवसंयोगपूर्वो न भवति य
ण्गोः नरेन्तोपधायाः नचैतस्थाने कार्योऽगस्य गुणः स्यात् अचि सुपि खलप्वौ खलप्वः एवं सल्वा
दयः स्वभूः स्वभुवौ स्वभुवः वर्षाभूः वर्षाभ्वश्च अस्य यणस्यात् अचि सुपि वर्षाभ्वावित्यादि

ल॰ कौ॰ १०

ह्मभ्यः हकारस्य गुनः शृङ्गेस्वधवोयणेवङ्गच्छः हरभ्यो एवंकरभूः पुनर्भूः धाता हेधातः धातारौ
धातारः ऋवर्णान्नस्य णत्वं वाच्यं धातॄणां एवंनप्त्रादयः नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं
तेनेह न पिता पितरौ पितरः पितरं पितरौ शेषंधातृवत् एवंजामात्रादयः ना नरौ नरः नृ
च अस्य नामि वा दीर्घः स्यात् नृणां नॄणां गोतो णित् ओकाराद्विहितं सर्वनामस्थानं णि
द्वत्स्यात् गौः गावौ गावः औतोम्शसोः ओतोम्शसोराच्याकारैकादेशः स्यात् गां
गावौ गाः गवा गवे गोः गोरित्यादि रायो हलि रैशब्दस्याकारादेशो हलि विभक्तौ राः
रायौ रायः रायं रायौ रायः राया राभ्यामित्यादि ग्लौः ग्लावौ ग्लावः ग्लौभ्यामित्या
दि इत्यजन्ताः पुंल्लिङ्गाः रमा औङ आपः आबन्तादङ्गादौङः शी स्यात् औङित्यौकारविभक्तेः
संज्ञा रमे रमाः संबुद्धौ च आप एकारः संबुद्धौ हे रमे हे रमे हे रमाः आङि चापः आङि ओसि
चाप एकारः स्यात् रमया रमाभ्यां रमाभिः याडापः आपः परस्य ङितो याडागमः स्यात् वृ
द्धिः रमायै रमाभ्यां रमयोः रमाणां रमायां रमासु एवं दुर्गाम्बिकादयः सर्वनाम्नः स्याड्ढ्र
स्वश्च आबन्तात्सर्वनाम्नो ङितः स्यात् आपश्च ह्रस्वः सर्वस्यै सर्वस्याः २ सर्वस्याम् शेषं र
मावत् एवंविश्वादय आबन्ताः विभाषा दिक्समासे बहुव्रीहौ सर्वनामता वा या उत्तरपूर्वस्य
स्याः उत्तरपूर्वायाः तस्यै उत्तरपूर्वस्यै उत्तरपूर्वायै एवमुत्तरत्र तीयस्य ङित्सु वा संज्ञाहि

नीयते द्वितीयायै एवं तृतीया अम्बार्थनद्योर्ह्रस्वः हेऽम्ब हेऽक्क हेऽत्त हेऽल्ल असंयु-
क्तायेऽल्लकास्तद्वतां ह्रस्वो न हेऽम्बाडे हेऽम्बाले हेऽम्बिके जरा जरसौ जरस इत्यादि एवं र-
मावत् गोपा विश्वपावत् मतिः इति निरूप्य श्वश्रू इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलि-
ङ्गौ ईदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तः ङिति मत्यै मतये मत्याः मतेः २
आण्नद्याः इदुद्भ्यां नदीसंज्ञकाभ्यां इकारोकाराभ्यां परस्य ङेः आम् आदेशः स्यात् मत्यां मतौ
शेषं हरिवत् एवं बुद्ध्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीलिङ्गयोरेतयोरेतौ आवि-
भक्तौ अचि र ऋतः तिसृचतस्रोः ऋतो रेफादेशो विभक्तौ गुणदीर्घोत्वानामपवादः ति-
स्रः २ तिसृभिः तिसृभ्यः २ आमि तु न तिसृचतसृ एतयोर्नामि न दीर्घः तिसृणां ति-
सृषु द्वेवत् समतिद्याप् द्वे २ द्वाभ्यां २ द्वयोः २ गौरी गौर्यौ गौर्यः हे गौरि एवं नद्यादयः लक्ष्मी-
लक्ष्मीः शेषं गौरीवत् एवं तरी तन्त्र्यादयः स्त्री हे स्त्रि स्त्रियः स्त्रीशब्दस्य इयङ् अन्तादेशस्य
ये स्त्रियौ वाम्शसोः स्त्रियं वा इयङ् अमि शसि च स्त्रियं स्त्रीं स्त्रियः स्त्रीः स्त्रिया स्त्रि-
यै स्त्रियाः २ परत्वान्नुट् स्त्रीणां स्त्रीषु श्रीः श्रियौ श्रियः नेयङुवङ्स्थानावस्त्री । इयङु-
वङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तः न तु स्त्री हे श्रीः श्रिया श्रियै श्रिये श्रिः-
याः श्रियः २ श्रियो वामि इयङुवङ्स्थानौ स्त्र्याख्यौ तु आमि वा नदीसंज्ञौ नवस्त्री श्रि

यो श्रीणां श्रियि श्रियां धेनुर्मतिवत् स्त्रियां च स्त्रीगवीक्रोष्टुशब्दस्तृज्वद्रूपं लभते क्रो
ष्ट्र्योः ङीप् ऋन्नेभ्यो ङीप् ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् क्रोष्ट्री वधूः गौरीवत् भूः श्रीवत् स्वयंभूः
पुंवत् न षट्स्वस्रादिभ्यः षभ्यो ङीप् टापौ न स्तः स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता
तथा याता मातेति सप्तैते स्वस्रादय उदाहृताः स्वसा स्वसारौ माता पितृवत् द्यौस्मा
तृः द्यौर्गोवत् राः पुंवत् नौः ग्लौवत् इत्यजन्ताः स्त्रीलिङ्गाः अतोम् अतोऽङ्गात् क्ली
बात् स्वमोरं ज्ञानं एङ्ह्रस्वादिति लोपः हे ज्ञान नपुंसकाच्च क्लीबादौङः शी भसं
ज्ञायां यस्येति च यकारे तद्धिते च भस्यावर्णवर्णयोर्लोपः इत्यतो लोके प्राप्ते औङः ।।
यचां प्रतिषेधो वाच्यः ज्ञाने जश्शसोः शि क्लीबाज्जश्शसोः शिः स्यात् शिसर्वनामस्था
नं नपुंसकस्य झलचः झलन्तस्याजन्तस्य च क्लीबस्य स्यात्सर्वनामस्थाने मिदचोन्त्यात्परः
अचां मध्ये योन्त्यस्तस्मात्परस्तस्यैवावयवो मित्स्यात् उपधादीर्घः ज्ञानानि पुनस्तद्व
त् शेषं पुंवत् एवं धनवनफलादयः अद्ड्डतरादिभ्यः पञ्चभ्यः एभ्यः क्लीबेभ्यः स्वमोरद्डादे
शः स्यात् टेः इति भस्य टेर्लोपः कतरत् कतरद् कतरे कतराणि हे कतरत् हे कत
रद् शेषं पुंवत् कतमत् इतरत् अन्यत् अन्यतरत् अन्यतमस्य त्वन्यतममित्येव एक
तरात्प्रतिषेधः एकतरं ह्रस्वो नपुंसके प्रातिपदिकस्य अजन्तस्येत्येव श्रीपं ज्ञानवत् स्व

मोनपुंसकात् लुक् स्यात् वारि इकोऽचि विभक्तौ इगन्तस्य क्लीबस्य नुमचि विभक्तौ वारिणी
वारीणि नलुमतेत्यस्यानित्यत्वात् पक्षे सम्बुद्धिनिमित्तो गुणः हे वारि हे वारे वेति नीमित गुणाप्रम
हृद्वौ नन्तस्ववद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन वारिणे वारिणः २ वारिणोः २ नुमचिरेतित्र
ट् वारीणां वारिणि हलादौ हरिवत् तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य यत्र निमि
त्तैके भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा नाजादावचि अनादयेऽनादिनेत्यादि यन्निमित्तपथा
यपुंसि शब्दः प्रवर्तते क्लीबवृत्तित्वेऽपि स्यादुक्तपुंस्कं नतु यथा पीलवे फलाय अत्र पुंवन्न अत्र नि
निमित्तभेदात् अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः टादावचि अल्लोपोऽनः अंगावयवोऽसर्वनाम
स्थानयकाराजादिस्वादिप्रत्ययेषु नस्याकारस्य लोपः दध्ना दध्ने दध्नः दध्नोः दध्नाम् विभा
षा ङिश्योः अनावयवोपधान् नस्यकारस्य लोपो वा ङिश्योः दध्नि दधनि शेषं वारिवत् एवम
स्थिसक्थ्यक्ष्णामपि सुधि सुधिनी सुधीनि हे सुधि हे सुधे उक्तपुंस्कं पुंवद्वा सुधिया सुधिना
इत्यादि मधु मधुनी मधूनि हे मधु हे मधो एवं जत्वादयः मृदु मृदुनी मृदूनि मृदुना मृ
दुनेत्यादि धातृ धातृणी धातॄणि हे धातः हे धातृ धातॄणां धात्रा धातृणा एवं ज्ञात्रादयः
एच इग्घ्रस्वादेशे आदिश्यमानेषु ह्रस्वेषु मध्ये एच इक स्यात् प्रद्यु प्रद्युनी प्रद्यूनि प्रद्युने
त्यादि प्ररि प्ररिणी प्ररीणि प्ररिणा एकदेशविकृतमनन्यवत् इत्यजन्ता नपुंसकलिङ्गाः

ढोढः हस्य ढः स्यात् झलि पदान्ते च लिट् लिड् लिहौ लिहः लिड्भ्यां लिट्सु लिट्त्सु दा
देर्धातोर्घः । झलि पदान्ते चोपदेशे दादेर्धातोः हस्य घः स्यात् एकाचो बशो भष् झषन्तस्य स्थ्वोः
धात्ववयवस्य एकाचो झषन्तस्य बशो भष् स्यात् । सध्वे पदान्ते च । धुक् धुग् दुहौ दुहः धुग्भ्यां धु
त्सु वा द्रुहमुहष्णुहष्णिहाम् एषां हस्य वा घः झलि पदान्ते च ध्रुक् ध्रुग् ध्रुट् ध्रुड् द्रुहौ द्रुहः ध्रु
ग्भ्यां ध्रुड्भ्यां ध्रुक्षु ध्रुट्सु एवं मुट् धात्वादेः षः सः स्नुक् स्नुग् स्नुट् स्नुड् एवं स्निट् इग्य
णः सम्प्रसारणम् यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसंज्ञः स्यात् । वाह ऊठ् भस्य वाहः
सम्प्रसारणम् ऊठ् सम्प्रसारणाच्च सम्प्रसारणात् अचि पूर्वरूपमेकादेशः एत्येधत्यूठ्सु विश्वौहः इत्यादि च
तुरनडुहोराम् अनयोराम् स्यात् सर्वनामस्थाने सावनडुहः अस्य नुम् स्या
त् अनड्वान् अनड्वाहौ अनड्वाहः वसुस्रंसुध्वंस्वनडुहां दः सान्तवसन्तस्य स्रंसादेश्च दः स्यात्
पदान्ते अनडुद्भ्यामित्यादि पदान्ते किं स्वस्तं सहेः साडः सः साड्रूपस्य सहेः सस्य मूर्धन्यादे
शः तुराषाट् तुराषाहौ तुराषाड्भ्यामित्यादि दिव औत् दिव इति प्रातिपदिकस्य औत् स्यात् सौ स
द्यौः सुदिवौ सुदिवः दिव उत् पदान्ते सुद्युभ्यामित्यादि चत्वारः चतुरः चतुर्भिः चतुर्भ्यः । १२
षट्चतुर्भ्यश्च । एभ्य आमो नुडागमः रषाभ्यां नो णः समानपदे चतुर्णाम् रोः सुपि रोरेव विस
र्गः सुपि चतुर्षु मो नो धातोः पदान्ते प्रशान् किमः कः विभक्तौ कः कौ के इत्यादि सर्ववत्

इदमोमः सौ त्यदाद्यत्वापवादः इदोऽयंपुंसि इदमइदोऽय् पुंसि सौ अयम् त्यदाद्यत्वे अतो
गुणे अपदांतात्स्वेतोऽगुणेऽपवादः पररूपमेकादेशः इमौ इदमोऽस्यमःस्यात् विभक्तौ इमौ इ
मे इदादेस्संबोधनं नास्तीत्युक्तत्वात् अनाप्यकः अककारस्येदम इदेन् आपिविभक्तौ आपि
तिमस्याहारः अनेनहलिलोपः अककारस्येदमइदोलोप् आपिहलादौ नानर्थकेऽलोन्त्य
विधिरनभ्यासविकारे आद्यंतवदेकस्मिन् एकस्मिन्क्रियमाणे कार्यमाद्यंतयोरिवस्यात् ए
षिचेनिर्दीर्घः आभ्यामनेनेदमइदोऽककारयोरिदमइदोर्भिसेप्येत्वमपि भिः एभिः एभ्यः
अस्मात् अस्य अनयोः २ एषामस्मिन् एषु द्वितीयाटौस्स्वेनः इदमेनदेशस्त्वादेशो किं
चित्कार्यं विधातुमनूद्य पुनरन्यत्कार्यं विधातुं पुनरुपादानमन्वादेशः यथानेन व्याकरणमधी
तमेनं छन्दोऽध्यापयेति अनयोः पवित्रं कुलं एनयोः प्रभूतं स्वमिति एनं एनौ एनान् एनेन
एनयोः राजा इदितसंबुद्धौ नस्यलोपो नञोसंबुद्धौच हेराजन् नाङ्गनरमेदप्रतिषेधः स्व
त्वविधिः राजानौ राजानः राजानं राजानौ राज्ञः राजभ्यां यज्वायज्वानौ २ यज्वनः सं
योगाद्वमांतात्तु वमांतसंयोगादनोकारस्य लोपो न यज्वनः यज्वभ्यां ब्रह्मा ब्रह्मणाः ब्र
ह्मणा । वृत्रहन्पूषार्यमणां शौ । एषामुपधायादीर्घः सौच रत्नादीनामुपधादीर्घो संबु
द्धौसो वृत्रहा हेवृत्रहन् एकाज्नरपदेणः एकाचउत्तरपदं यस्य तस्मिन्समासेपूर्वपदस्थ

ल. कौ. १२

यानिमित्तान्यरस्य अनिपदिकांतउत्विभक्तिस्यस्यनस्यणः वृत्रहणौ वृत्रहणः । होहं
तेर्ञ्णिन्नेषु । ञितिणितिप्रत्यये नकारे च परे हन्तेर्हस्य कुत्वं वृत्रघ्न इत्यादि एवं शार्ङ्गिन् यशस्वि
न् अर्यमन् पूषन् मघवा बहुलं मघवन् शब्दस्य वा तृ इत्यादेशः ऋ इत् नानुबंधकृ
तमनेकाल्त्वम् उगिदचां सर्वनामस्थानेऽधातोः अधातोरुगितो नलोपिनोंचतेश्च नु
म्स्यात् सर्वनामस्थाने संयोगान्तलोपस्यासिद्धत्वान्नलोपो न मघवान् मघवन्तौ मघ
वन्तः मघवन्तं मघवन्तौ मघवतः हे मघवन् तृत्वाभावे राजवत् श्वयुवमघोनामत
द्धिते अन्नन्तानां भसंज्ञानां एषामतद्धिते संप्रसारणं स्यात् मघोनः मघवभ्याम् एवं श्वन् युव
न् । नसंप्रसारणेसंप्रसारणं । संप्रसारणे परतः संप्रसारणं न शुनः युवभ्याम् इत्यादि
अर्वा हे अर्वन् अर्वणस्त्रसावनञः नञा रहितस्यार्वन्नित्यस्य तृ इत्यन्तादेशो न तु सौ अर्वन्तौ
अर्वन्तः अर्वद्भ्यामित्यादि अनञः किं अनर्वा पथिमथ्यृभुक्षामात् सौ इतोत्सर्वनामस्था
ने पथ्यादेः थोन्थः पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने पन्थाः पन्थानौ भस्य टेः
लोपः भस्य पथ्यादेष्टिलोपः पथा पथा पथिभ्यः एवं मथिन् ऋभुक्षाः ष्णान्ता षट् ष्णां
तानां नान्ता च संख्या षट्संज्ञा स्यात् पंच पंच पंचभिः पंचभ्यः लुक् नोपधायाः नान्तस्योपधा
या दीर्घो नामि पंचानां पंचसु अष्टन आ विभक्तौ हलादौ वा स्यात् अष्टाभ्य औश् कृताका १२

राम्रत्रेनोऽनस्पासोरौषा अष्टाभिरिति निवृत्तव्येकृतानात्वनिर्देशोन स्पासो विषयेऽप्रातं स्तापयति अ॰
ष्टौ २ अष्टाभिः अष्टाभ्यः २ अष्टानां अष्टासु आत्वाभावे अष्ट मंववत् ऋत्विग्दधृक्स्रग्दिगुष्णिग
युञ्जिक्रुञ्चांच यभ्यः क्विप् अंचेरप्यमयोस्तुनिकुंचोः केवलयोः अंचेनयोमाभावश्चनिपा
त्यते कताविती कुदितिङ् अत्रयातनिकारोतिङ् भित्रः प्रत्ययः हलसंज्ञाः वेरपृक्तस्य लोपः
स्विन्नप्यपस्पृक्तः क्विप्रत्ययोयस्मात्स्पवर्गात्तादेशः पदांते ऋत्विक् ऋत्विजौ ऋत्विजः
ऋत्विग्भ्यां युजेरसमासे। युजेसर्वनामस्थाने नुम्स्यात् असमासे हलोपः संयोगांतस्य
लोपः उत्तेननस्पर: युङ् युंजौ युंजः युग्भ्यां चोः कुः कवर्गस्य वर्गकः स्यात् झलिपदां
ते स्रुक् स्रुजौ स्रुग्भ्यां खन् खंजौ खंज्याम्। भ्रस्जसृजमृजयजराजभ्राजच्छ्र
शां षः। पदांतवांतयोश्च षः स्यात् झलिपदांतेनेव जषत्ववर्त्ते राड् राट् राजौ राड्भ्यां एवं
विभ्राट् देवेट् विश्वसृट्. पर्यो व्रजेः क्यः पदांते परावुपपदे व्रजेः क्विप् स्यात् परिव्राजौ। वि
श्वस्यवसुराटोः। विश्वस्य दीर्घः वसौ राडिचपरे राभिनिपदांतेनाल्वत्वाणार्थे विश्वाराट् वि
श्वाराड् विश्वराजौ विश्वाराड्भ्यां। स्कोः संयोगाद्योरंते च। पदांते झलि च यः संयोगः त
दाद्योः सकारककारयोः लोपः भृट् सस्पृक्तवेनषः नलोजस्य कर्थाद्दिनिशास्पजः भृंज्जौ
भृड्भ्यां त्यदादीनामःसर्वपरस्मपतं। तदोसः सावनंत्ययोः। यदादीनांडोनानांतदोरनंत्ययोः स॰

ल॰ स्यात् सौ स्यः त्यौ त्ये मः त्यौ मे यः यौ ये एष एतौ एते ३ इति प्रथमयोरम्। युष्मदस्मदोः पर
कौ॰ स्य ङे ङस्योस्तस्य प्रथमाद्वितीययोश्चामादेशः त्वाहौ सौ अनयोर्मपर्यन्तस्य त्वाहादेशः स्तः सौ शे
२४ षलोपः एतयोष्टिलोपः त्वम् अहम्। युवावौ द्विवचने। अनयोर्मपर्यन्तस्य यु
14 वावौ स्तो प्रथमायाश्च द्विवचने भाषायां औङ् इत्येतयोरात्वं लोके युवाम् आवाम्। यूयवयौ जसि ।
अनयोर्मपर्यन्तस्य यूयं वयं। त्वमावेकवचने। एकस्योक्तौ अनयोर्मपर्यन्तस्य त्वमौ स्तः द्वि
तीयायां च अनयोः आत् त्वाम् माम्। शसो नः। अभ्यां परस्य शसो नः स्यात् शामोऽपवादः आदेः
परस्य संयोगान्तस्य लोपः युष्मान् अस्मान्। योऽचि। अनयोर्यादेशोऽनादेशे अजादौ त्वया मया
युष्मदस्मदोरनादेशे अनयोरात् स्यात् हलादौ युवाभ्यां आवाभ्यां युष्माभिः अस्माभिः
तुभ्यमह्यौ ङयि। अनयोर्मपर्यन्तस्य टिलोपः तुभ्यं मह्यं न यि एवे भ्यसो भ्यम्। अभ्यां परस्य
युष्मभ्यं अस्मभ्यं एकवचनस्य अभ्यां ङसेरात् त्वत् मत् पञ्चम्याश्चत् अभ्यां परस्य पञ्चम्या भ्य
सोऽत् युष्मत् अस्मत्। तवममौ ङसि। अनयोर्मपर्यन्तस्य युष्मदस्मदोर्ङसि तवमौ स्यात् तव
मम युवयोः आवयोः साम आकम्। अभ्यां परस्य साम आकं युष्माकम् अस्माकं त्वयि मयि यु २४
ष्मासु अस्मासु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ पदात्परयोरपादादौ स्थि
तयोः षष्ठ्यादिविशिष्टयोर्वा नाव् इत्यादेशौ स्तः। बहुवचनस्य वस्नसौ उक्तविषययोरेवानयोः

षष्ठ्यादिबहुवचनांतयोः वस्नसौ स्तः तेमयावेकवचनस्य उक्तविधयोरनयोः षष्ठीचतुर्थ्ये
कवचनांतयोस्तेमेस्तःस्तः त्वामौ द्वितीयायाः द्वितीयैकवचनांतयोः एतौ नामास्तः श्रीशस्त्वा
वतेमापीहदेवाग्नेमेपिशर्मसः त्वामीतेमेपिसहरिः पातुमामपिनौविभुः सुखंवांनोददात्वीश
शः पतिर्वामपिनौहरिः सोव्याद्वोनःशिवंवोनोदद्यात्सेव्योत्रवःसनः एकवाक्ये युष्मदस्मदा
देशावक्तव्याः एकतिङ्वाक्यं तेनेहन ओदनंपच तवभविष्यति एतेवांनावादयआदेशाः
अनन्वादेशेवावक्तव्याः अन्वादेशेतुनित्यंस्युः धातातेभक्तोस्तिधातातवभक्तोस्तीतिवान्व
येतेनमदेस्येव त्यपात् त्यपादौ त्यपादः पादःपत् पाच्छब्दांतेपदेरोपदंत्यवयवस्यपा
च्छब्दस्यपदादेशः त्यपदः त्यपाद्भ्यां अग्निमत् अग्निमथौ अग्निमथः अग्निमद्भ्यां अनिदितां
हलउपधायाःक्ङिति हलन्तानामनिदितांसंयोगानामुपधायानस्यलोपः किङितिङिति नुम् सं
योगांतस्यलोपः नस्यकुत्वेननः प्राङ् प्राञ्चौ प्राञ्चः । अचः । लुप्तनकारस्यांचतेर्भस्याकारस्य
लोपः चौ लुप्ताकारनकारांचतौ परे पूर्वस्याणोदीर्घः प्राचःप्राग्भ्यां प्रत्यङ् प्रत्यंचौ प्रतीचः
प्रत्यग्भ्यां उदङ् उदंचौ उदईत् उच्छब्दात्परस्यलुप्तनकारांचतेर्भस्याकारस्यईत् उदीचः उदग्भ्यां
समःसमि वप्रत्ययांतेंचतौ सम्यङ् सम्यंचौ समीचः सम्यग्भ्यां सहस्यसध्रिः तथासध्र्यङ्
तिरसस्तिर्यलोपः अलुप्ताकारेंचतौवप्रत्ययांते तिरसस्तिर्यादेशः तिर्यङ् तिर्यंचौ तिरश्चः :

ल० कौ० १५ 15

तिर्यग्भ्यां नाञ्चेः पूजायां पूजार्थस्याञ्चतेरुपधाया नस्य न लोपो न प्राङ्. प्राञ्चौ नलोपाभावादद्
लोपो न प्राञ्चः प्राङ्भ्यां प्राङ्क्षु एवं पूजार्थे प्रत्यङ्ङादयः क्रुङ्. क्रुञ्चौ क्रुञ्चः क्रुङ्भ्यां पयोमुक् प
योमुग् पयोमुचौ पयोमुचः पयोमुग्भ्यां उगित्वान्नुम् । सान्तमहतः संयोगस्य सान्तसंयोगस्य महत
श्च नकारस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने महान् महान्तौ महान्तः हे महन् मह
न्तः महता महद्भ्यां अत्वसन्तस्य चाधातोः । अत्वन्तस्योपधाया दीर्घो धातुभिन्नासन्तस्य चासंबु
द्धौ सौ धीमान् धीमन्तौ हे धीमन् शसादौ महद्वत् । भातेर्डवतु । डित्सामर्थ्यादभस्यापि
टेर्लोपः भवान् भवन्तौ शत्रन्तस्य भवन् । उभे अभ्यस्तं । षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते
उभे समुदिते अभ्यस्तसंज्ञे स्तः । नाभ्यस्ताच्छतुः । अभ्यस्तात् शतुर्नुम् न ददत् ददतौ जक्षित्याद
यः षट् षड्धातवोऽन्ये जक्षितिश्च सप्तम एतेऽभ्यस्तसंज्ञाः स्युः जक्षत् जक्षतौ एवं जाग्रत् दरिद्र
त् शासत् चकासत् दीध्यत् वेव्यत् गुप् गुब् गुपौ गुपः त्यदादिषु दृशोऽनालोचने कञ्च
त्यदादिषूपपदेष्वज्ञानार्थाद्दृशेः कञ् चात् क्विन् आ सर्वनाम्नः दृग्दृशवतुषु तादृक्
तादृशौ तादृग्भ्यां व्रश्चेति षः जश्त्वचर्त्वे विराट् विराड् विराजौ विराड्भ्यां नशेर्वा नशेः कवर्गोऽन्तादे १५
शो वा पदान्ते नक् नग् नट् नड् नशौ नशः नग्भ्यां नड्भ्यां स्पृशोऽनुदके क्विन् अनुदके सु
प्युपपदे स्पृशेः घृतस्पृशः दधृक् दधृषौ दधृग्भ्यां रत्नमुट् रत्नमुषौ रत्नमुड्भ्यां षट् षड्भिः ष

भ्यः षसां षट्सु रुत्वं प्रति षत्वस्यासिद्धत्वात्ससजुषो रुरिति रुत्वं वोरुपधाया दीर्घ इकः रेफ
वान्तस्य धातोरुपधाया इको दीर्घः पदान्ते पिपठीः पिपठिषौ पिपठीर्भ्यां । नुम्विसर्जनीयश
र्व्यवायेऽपि । एभिः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यः ष्टुत्वेन पूर्वस्य षः पिपठीष्षु चि
कीः चिकीर्षुः विद्वान् विद्वांसौ हे विद्वन् । वसोः संप्रसारणं । वस्वन्तस्य भस्य संप्रसारणं स्यात्
विदुषः वसुस्रंसुध्वंस्वनडुहां दः विद्वद्भ्यां पुंसोऽसुङ् सर्वनामस्थाने पुमान् हे पुमन् पुमांसौ पुंसः
पुंभ्यां पुंसु ऋदुशनस्पुरुदंसोऽनेहसां च उशना उशनसौ अस्य संबुद्धौ वानङ् नलोपश्च वा वाच्यः हे उशनन् हे उ
शन हे उशनः उशनोभ्यां अनेहा अनेहसौ वेधाः वेधसौ हे वेधः वेधोभ्यां । अदस औ सु
लोपश्च अदस औ स्यात्सौ सुलोपश्च त्यदाद्यत्वं पररूपत्वं वृद्धिः अदसोऽसेर्दा
दुदो मः अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च आन्तरतम्याद्ध्रस्वस्य उ दीर्घस्य ऊः अमू जसः
शी गुणः एत ईद्बहुवचने अदसो दात्परस्यैत ईत् दस्य मो बहूक्तौ अमी पूर्वत्रासिद्धमिति
विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे अमुं अमू अमून् मुत्वे कृतेऽपि घिसंज्ञायां नाभावः न मु ने ना
भावे कर्तव्ये कृते च मुभावो नासिद्धः अमुना अमूभ्यां अमीभिः अमुष्मै अमीभ्यः अमुष्मात् अ
मुष्य अमुयोः अमीषां अमुष्मिन् अमीषु ॥ इति हलन्ताः पुंलिङ्गाः ॥ नहो धः झलि पदां
न्ते च । नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ । क्विबन्तेषु पूर्वस्य दीर्घः उपानत् उपानहौ

ल० कौ० १६ 16

उपानहः उपानद्भ्यां उपानत्सु क्विबन्तत्वात्कुत्वेनचः उष्णिक् उष्णिहौ उष्णिग्भ्यां द्यौः दिवौ दिवः
द्युभ्यां गीः गिरौ गिरः गीर्भिः एवं पूः चतस्रः २ चतसृणां काकेकाः सर्ववत् यःसौ इदमो
दस्ययः सौ इदमोमः इयं त्यदाद्यत्वं टाप् दश्चेतिमः इमे इमाः इमां अनया हलि लोपः आभ्यां
आभिः अस्यै अस्याः २ अनयोः आसां अस्यां आसु स्रक् स्रजौ स्रग्भ्यां त्यदाद्यत्वं टाप् स्या स्ये
स्याः एवं तद् यद् एतद् वाक् वाचौ वाग्भ्यां अप्शब्दोबहुवचनान्तः अप्तृन्निति दीर्घः आपः
अपः अपोभिः अपस्तकारो भादौ प्रत्यये अद्भ्यः २ अपां अप्सु दिक् दिशौ दिग्भ्यां त्यदादि
ष्विति सूत्रे क्विन्विधानादन्यत्रापि कुत्वं दृक् दृशौ दृग्भ्यां त्विट् त्विषौ त्विड्भ्यां ३ ससजु-
षोरुरिति रुत्वं सजूः सजुषौ २ सजूर्भ्यां ३ आशीः आशीर्भ्यां ३ असौ उत्वमत्वे अमू अमूः
अमुया अमूभ्यां ३ अमूभिः अमुष्यै अमूभ्यः २ अमुष्याः २ अमुयोः २ अमूषां अमुष्यां अमूषु
इति हलन्ताः स्त्रीलिङ्गाः ॥ स्वमोर्लुक् । दत्वं स्वनडुत् स्वनडुही स्वनडुही चतुरनडुहोरित्या-
म् स्वनडुंहि पुनस्तद्वत् शेषं पुंवत् वाः वारी वारि २ वारा वार्भ्यां ३ चत्वारि २ किं के
कानि इदं इमे इमानि अन्वादेशे नपुंसकैकवचने एनद्वक्तव्यः एनत् एने एनानि एनेन एनयोः २ १६
ब्रह्मसंबुद्धौनपुंसकानां नलोपः वा वाच्यः हे ब्रह्मन् हे ब्रह्म ब्रह्मणी ब्रह्माणि अह्नः विभाषा
ङिश्योः अह्नी अहनी अहानि २ हे अहः अहन् अहन्नित्यस्य रुः पदान्ते अहोभ्यां ३ दण्डि

वानडुहसकस्य अभ्यस्तात् जीवात्परस्य शातुर्नुम् वास्यात्सर्वनामस्थाने ददंति ददति तुदत्
आच्छीनद्योर्नुम् अवर्णात्परस्य शतुर्नुम्वा शीनद्योः तुदंती तुदती ददंति भात् भांती भाती
भांति पचत् शप्श्यनोर्नित्यं शप्श्यनोरात्परस्य शीनद्योः शतुरवयवः नदंतस्यनुम् शीनद्योः प
चंती पचंति दीव्यत् दीव्यंती दीव्यंति धनुः धनुषी सांतीतिदीर्घः धनूंषि नुंविसर्जनी
यशर्व्यवायेपि इणिषः धनुषा धनुर्भ्यां एवं चक्षुर्हविरादयः पयः पयसी पयांसि २ पयसा
पयोभ्यां ३ पयोभिः सुपुं सुपुंसी सुपुंमांसि अदः विभक्तिकार्यं उत्वमत्वे अमू अमूनि शे
षंपूर्ववत् ॥ इतिहलंतानपुंसकलिंगानि ॥ अथ स्वरादिनिपातमव्ययं स्वर् अंतर् प्रातर् पुनर्
सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आसात् पृथक् ह्यस् श्वस् दिवा रा
त्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीं बहिस् अवस् समया निकषा स्वयं वृथा
नक्तं नञ् हेतौ इद्धा अद्धा सामिवत् ब्राह्मणवत् क्षत्रियवत् सनात् उपधासनात् तिरस्
अंतरा ज्योक् कं शं सहसा विना नाना स्वस्ति स्वधा अलं वषट् श्रौषट् वौषट् अन्यत् अ
स्ति उपांशु क्षमा विहायसा दोषा मृषा मिथ्या मुधा पुरा मिथो मिथस् प्रायस् महस्

पयस् प्रवाहि कं आह अलं अभीक्ष्णं साकं सार्धं नमस् हिरुक् धिक् अथ अथो अम् आम् ।
प्रतान् प्रशान् माहे माङ् आकृतिगणोयं ॥ च वा ह अह एव एवं नूनं शश्वत् युगपत्
विपत् संपत् कुवित् चित् चण यत्र कच्चित् नह हंत माकि माकी नाकि नाकी माङ् नञ्
यावत् तावत् त्वै द्वै श्रौषट् वौषट् स्वाहा स्वधा वषट् तुम् तथाहि खलु किल सुष्ठु स्म अं
ग इति उपसर्गविभक्तिस्वरप्रतिरूपकाश्च अवदत्तं अहंयुः अस्तिक्षीरा अ आ इ ई उ ऊ ऋ ए
ऐ ओ औ पशु शुकं यथा कथाच पाट् प्याट् अंग है हे भो अये एकपदे यत् तत् चादिर
प्याकृतिगणः तसिवती नानाञौ एतदंतमव्ययमित्यादि कृन्मेजंतः कृत्वोमांतपजंतश्चेत
दंतमव्ययं स्मात्स्मात् जीवसे पिबध्यै क्त्वातोसुन्कसुनः एतदंतमव्ययं षष्ठ्या वा तदेनांगविस्र
पः अव्ययीभावश्च अधि हरि अव्ययादाप्सुपः अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात् त
त्र शालायामत्र सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्य
यं वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हलंतानां यथा वाचा निशा दिशा १
वगाहः अवगाहः पिधानम् अपिधानं ॥ इत्यव्ययानि ॥ ॐ नमो विघ्नहर्त्रे अथ तिङंतं ॥ १९

स्कुरुते गुणमाधत्ते कथाः प्रकुरुते प्रकथयति शतं प्रकुरुते धर्मार्थं विनियुङ्क्ते प्रकर
किं च त्वं करोति भुजोनवने ओदनं भुङ्क्ते अनवने इति किं महीं भुनक्ति इत्यात्मनेपदप्रक्रिया अनु
पराभ्यां कृञः कर्त्रगेव फले गन्धनादौ च वाच्ये परस्मैपदं स्यात् अनुकरोति पराकरोति अभि
प्रत्यतिभ्यः क्षिपः क्षिप प्रेरणे क्षिपति अभिक्षिपति प्राद्वहः प्रवहति परेर्मृषः । परिमृ
ष्यति व्याङ्परिभ्यो रमः रमु क्रीडायां विरमति उपाच्च यज्ञदत्तमुपरमति उपरमतीत्यर्थः
अन्तर्भावितण्यर्थोयं इति परस्मैपदव्यवस्था भावकर्मणोः लस्यात्मनेपदं सार्वधातुके यक् भाव
कर्मवाचिनि धातोर्यक् सार्वधातुके भावः क्रिया सा च भाववाच्यैकत्वल्लकारेणानूद्यते न च यु
ष्मदस्मद्भ्यां समानाधिकरण्याभावात् प्रथमपुरुषः तिङ्वाच्यक्रियायाः अद्रव्यरूपत्वेन द्वित्वाद्य
प्रतीतेर्न द्विवचनादि किं त्वेकवचनमेवोत्सर्गतः त्वया मया अन्यैश्च भूयते बभूवे स्यसिच्सी
युट्तासिषु भावकर्मणोरुपदेशेज्झनग्रहदृशां वा चिण्वदिट् च उपदेशे योच् तदन्तानां हना
दीनां च चिणीवाङ्गकार्यं वा स्यात् स्यादिषु भावकर्मणोर्गम्यमानयोः स्यादीनां इडागमश्च
चिण्वद्भावपक्षेयमिट् चिण्वद्भावाद्वृद्धिः भाविता भविता भाविष्यते भविष्यते भूयतां
अभूयत भूयेत भविषीष्ट । चिण् भावकर्मणोः । च्लेश्चिण् भावकर्मवाचिनि तशब्दे परे
चिणो लुक् अभावि अभाविष्यत अभविष्यत अकर्मकोप्युपसर्गवशात्सकर्मकः अनुभू

ल. कौ. १८

38

यते आनंदस्त्वेणान्वयामयावा अनुभूयते अनुभूयंते त्वमनुभूयसे अहमनुभूयसे अनुभावि
अनुभाविष्यातां णिलोपः भाव्यते भावयांचक्रे भावयांबभूवे भावयामासे भावयिताऽ
विणवड्.आभीयतेनासिद्धत्वात् णिलोपः भाविता भाव्यते भावयिष्यते भाव्यतां अभाव्यत
भाव्येत भाविषीष्ट अभावि अभाविष्यातां अभावयिष्यातां बुभूष्यते बुभूषांचक्रे बुभूषिता
बुभूषिष्यते बुभूष्यत ष्टुञ्स्तुतौ अकृत्सार्वधातुकयोर्दीर्घः स्तूयतेविष्णुः स्ताविता स्तोता
स्ताविष्यतेस्तोष्यते अस्तावि अस्ताविष्यातां अस्तोष्यातां ऋगतौ गुणोर्त्तिसंयोगाद्योः अर्यते
स्मृस्मरणे स्मर्यते सस्मरे उपदेशाचहरणाश्चिण्वदिट्. आरिता अर्ता स्मारिता स्मर्ता
नलोपः स्रस्यते इदितस्तु नन्द्यते संप्रसारणं इज्यते तनोतेर्यकि तनोतेर्वा आत्स्यात् य
कि तायते तन्यते तपोऽनुतापे च तपतेः च्लेश्चिण्न स्यात्कर्मकर्तर्यनुतापे च अन्वतप्त पापेन
न चमात्स्यत्येवं दीयते धीयते ददे। आतो युक् चिण्कृतोः। आदन्तानां युगागमः स्याच्चिणि
ञ्णिति च दायिता दाता दायिषीष्ट दासीष्ट अदायि अदायिष्यातां भज्यते भञ्जेश्च चिणि
नलोपो वा अभाजि अभञ्जि लभ्यते विभाषा चिण्णमुलोः लभेर्नुम् अलंभि अलाभि यदाक
र्मैककर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात्कर्तरि भावे च लः कर्मवत्कर्मणा तु
ल्यक्रियः कर्मणा तुल्यक्रियः कर्ता कर्मवत्स्यात् कार्यातिदेशोऽयं तेन यगात्मनेपदं चिण् चि

एवरिड्स्युः पच्यते फलं भिद्यते काष्ठं अपाचि अभेदि वा भावे भिद्यते काष्ठेन । इति भावक
र्मप्रक्रिया । अभिज्ञावचने लृट् स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् लङोपवादः वस निवा
से स्मरसि कृष्ण गोकुले वत्स्यामः एवं बुध्यसे चेतयसे वा न यदि यद्योगे उक्तं न अभिजाना
सि यद्वने अभुंक्ष्म लट् स्मे लिटोपवादः यजति स्म युधिष्ठिरः वर्तमानसामीप्ये वर्तमानवद्वा
वर्तमाने ये प्रत्यया उक्तास्ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः कदा आगतोसि अयमागच्छा
मि आगमिष्यामि । हेतुहेतुमतोर्लिङ् । वा स्यात् कृष्णं नमेच्चेत्सुखं यास्यति भविष्यत्येवेष्यते
नेह हन्तीति पलायते विधिनिमन्त्रणेति लिङ्. विधिर्भृत्यादेर्निकृष्टस्य प्रवर्तनं यजेत नि
मन्त्रणं नियोगकरणं आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनं इह भुंजीत आमन्त्रणं का
मचारानुज्ञा अधीष्व सत्कारपूर्वको व्यापारः पुत्रमध्यापयेत् संप्रश्नः भोजनं लभेय एवं
लोट् । इति लकारार्थप्रक्रिया । इति श्रीवरदभट्टविरचितायां लघुकौमुद्यां तिङन्तप्रक्रिया

समाप्तः ॥ नमः सरस्वत्यै ॥ धातोः ॥ ॥

तृतीयाध्यायांतं ये प्रत्ययास्ते धातोः परे स्युः कृदतिङिति कृत्संज्ञा । वासरूपोस्त्रियां । अ
स्मिन्धात्वधिकारे असरूपोवादः प्रत्यय उत्सर्गस्य बाधकः स्त्र्यधिकारोक्तं विना कृत्याः ण्वुल् त
चावित्यतः प्राक् कृत्यसंज्ञाः स्युः कर्तरि कृदिति प्राप्ते तयोरेव कृत्यक्तखलार्थाः एते भावकर्म

ल. कौ. २९ 39

णोदेवस्तुः तव्यतव्यानीयरः धातोरेतेस्युः एधितव्यं एधनीयंत्वया भावे औत्सर्गिकमेक
वचनं क्लीबत्वंच चेतव्यश्चयनीयोवाधर्मस्त्वया केलिमर उपसंख्यानं पचेलिमामाषाः प
क्तव्याइत्यर्थः भिदेलिमाःकाष्ठाः कर्मणिप्रत्ययः कृत्यल्युटोबहुलं । क्वचित्प्रवृत्तिःक्व
चिदप्रवृत्तिःक्वचिद्विभाषाक्वचिदन्यदेव विधेर्विधानंबहुधासमीक्ष्यचतुर्विधंबाहुलकंवद
न्ति स्नात्यनेनस्नानीयंचूर्णं दीयतेऽस्मैदानीयोविप्रः अचोयत् चेयं ईद्यति अतः गु
णः देयंग्लेयं पोरदुपधात् पवर्गान्तादुपधाद्यत् ण्यतोऽपवादः शप्यंलभ्यं एतिस्तु
शास्वृदृजुषःक्यप् ह्रस्वस्यपितिकृतितुक् इत्यः स्तुत्यः शासइदङ्हलोः शासइदङ्हला
शासउपधायाइत्स्यात् अङि हलादौक्ङिति शिष्यः वृत्यः दृङ्आदरे आदृत्यः जुषी
प्रीतिसेवनयोः जुष्यः मृजेर्विभाषा मृजेःक्यप्वा मृज्यः ऋहलोर्ण्यत् ऋवर्णान्ताद्धल
न्ताच्चण्यत् कार्यंधार्यंहार्यं चजोःकुघिण्ण्यतोः चजोःकुत्वंस्यात् घिति ण्यतिच निष्ठा
यामनिट् इतिवक्तव्यं तेनेहन गर्ज्यं मृजेर्वृद्धिः मृजेरिकोवृद्धिः सार्वधातुकार्धधातुकयोः
उदितश्च मार्ग्यः भोज्यंभक्ष्ये भोग्यमन्यत् इतिकृत्यप्रक्रिया ॥ ण्वुल्तृचौ । धातोरेतौ
स्तः कर्तरिकृदितिकर्त्रर्थे युवोरनाकौ युवोःअनाकौस्तः कारकःकर्ता नन्दिग्र
हपचादिभ्योल्युणिन्यचः । नन्द्यादेःल्युःग्रहादेर्णिनिःपचादेरचस्यात् नन्दयतीतिनन्दनः

जनार्दनः लवनः ग्राहिलाघी मैत्रिगमपरिभाषणे मैत्रीपचः आक्रान्तिगणोयं इगुपदज्ञः
प्रीकिरः कः । लिपः बुधः कृशाः ज्ञः प्रियः किरः आतश्चोपसर्गे । प्रज्ञः सुग्लः गेहेकः गे
हकीर्तविग्रहेकः गृहं कर्मण्यण् कर्मण्युपपदे धातोरण् कुंभकारोत्यनिर्कुंभकारः अतोनु
पसर्गेकः आतोनुपवादः गोदः कंबलदः अनुपसर्गेतिकिं गोसंधायः मूलविभुजादिभ्यः कः
मूलानि विभुजंति मूलविभुजोरथः आकृतिगणोयं महीध्रः कुध्रः चरेष्टः अधिकरणेउ
पपदे कुरुचरः भिक्षासेनादायेषुच भिक्षाचरः सेनाचरः आदायेतिल्यबंतं आदायचर
स्थोहनताच्छील्यानलोमसु पशुघोषकंसेषु कुसोहः अनःअकर्मकेसकुंभपात्रकुशाग्र
कर्णेषुतस्यापस्य अनउनरस्यानविधविसर्गस्यसमासेनित्यंसादेशः कर्मण्यादिषुपरेषु पश
हरीविधा आड्करः वचनकरः एजेःखश एजतादेजेःखश स्यात् अरुर्द्विषदजंतस्यमुं
अरुषोनिषनोजनस्यच समागमः जिदेजे ननस्यपस्य श्रीदान्कुभादि यजस्कंपने जंतप
जपतीति जनमेजयः प्रियवशेवदःखच प्रियवदः वशंवदः अन्येभ्योपिदृश्यते मनि
पचानिष्ठु वनिप् विच् एतेभ्यस्यः धातोस्युः नेड्वशिकृति वशादेः कृतइण्न स्यादिसार्वा
त्वशर्माधातोर्विना विड्वनोरनुनासिकस्यात् अनुनासिकस्यात् विदिवनिच । विजायते
इति विजावा । रोणद्वयपनयने अवावा रुष रिष हिंसार्थे रोड् रेड् सगण । क्विप् ।

ल. अयमपि दृश्यते उखास्रत् पर्णध्वत् वाहभ्रट् सुप्यजातौ णिनिस्ताच्छील्ये अजात्यर्थे सुपि
कौ. धातोर्णिनिः ताच्छील्ये द्योत्ये उष्णभोजी शीतभोजी मनः सुपि मन्यतेर्णिनिः दर्शनीयमा
५. नी आत्ममाने खश्च स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् चाण्णिनिः पंडितमात्मानं
मन्यते इति पंडितंमन्यः पंडितमानी खित्यनव्ययस्य । खिदंतेऽनव्ययस्य ह्रस्वः कालिंमन्या
करणे यजः करणे उपपदे भूतार्थे यजेर्णिनिः कर्तरि सोमेनेष्ट
वान् सोमयाजी दृशेः क्वनिप् कर्मणि भूते पारं दृष्टवान् पारदृश्वा राजनि युधि कृञः
क्वनिप् युधिरंतर्भावितण्यर्थः राजानं योधितवान् राजयुध्वा । राजकृत्वा सहे च सहयु
ध्वा सप्तम्यां जनेर्डः । तत्पुरुषे कृति बहुलमित्यलुक् सरसिजं सरोजं उपसर्गे च संज्ञायां
प्रजा क्तक्तवतू निष्ठासंज्ञौ स्तः निष्ठा भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् तत्र तयोरेवेति भावकर्म
णोः क्तः कर्तरि क्तवतुः स्नातं मया स्तुतस्त्वया विष्णुः विश्वं कृतवान् रदाभ्यां निष्ठातो नः
पूर्वस्य च दः रदाभ्यां परस्य निष्ठातस्य नः निष्ठापेक्षया पूर्वस्य धातोर्दस्य च शॄ हिंसायां भि
दिर् विदारणे छिदिर् द्वैधीकरणे शीर्णः भिन्नः छिन्नः संयोगादेरातो धातोर्यण्वतः एव
संयोगादेरादंतान्निष्ठातस्य नः द्राणः ग्लानः ल्वादिभ्यः एकविंशतेर्ल्वादिभ्यः प्राग्व
त् लूनः ज्या वयोहानौ ग्रहिज्या हलः अंगावयवाद्धलः परं यत्संप्रसारणं तदंतस्यांगस्य

दीर्घः जीनः ओदितश्च प्राप्तः भुजो कौटिल्ये भुग्नः स्त्यादिभ्यो निष्ठायां स्त्यायतेरीदितः
च निष्ठायामिणन् ईङोस्तिगतिक्षयोः शूनः शुषः कः निष्ठातस्य शुष्कः पचो वः पक्वः क्षायो
मः क्षामः । प्रस्त्यौ विभाषा प्रस्त्यञ्चविंशतिर्हितस्ततो निष्ठायामपरेण गुणः निष्ठायां सेटि णेः
लोपः भावितः भावितवान् दृढः स्थूलबलयोः स्थूले बलवति च दृढ इति निपात्यते दृंहा
नेदिः गाहोऽकिति । हिंसे दाद्दोः प्रसंतोऽस्यटाइत्यस्य दहतादेशोऽकिति दत्तं दत्तं लिटः
कानच्क्वसुश्च लिटः कानच् क्वसुर्वा स्तः तनानादात्मनेपदं चक्राणः क्वसुश्च गमेस्तस्य
धातोर्नः स्वोपरतः जगन्वान् लटः शतृशानचावप्रथमासमानाधिकरणे लटः शतृशानचौ वा
स्तः शबादि पचन् पचमानः आनेमुक् एधमानो गच्छन् वर्तमानः लडित्यनुवर्तमाने प्र
थमेनैकवचनादावप्रथमासमानाधिकरणेऽपि क्वचित् सन् द्विजः विदेः शतुर्वसुर्वैवेत्वेपरस्य शतुर्व
सुरादेशो वा । वसेकाजाद्घसां क्वसौ एतद्दिनानामेकाचः सारन्तानां च सेड्वसोरिट् नान्ये
षां विदन् विद्वान् नोमन् नोशानचौ सत् तौ सत् लटः सद्वा करिष्यन्तं करिष्यमा
णं पश्य आकेनर्कीनदुर्मेतत्ताच्छील्ये क्रियायां क्रियार्थायां शीलादिषु क
र्तृषु वोध्यः तृन् कर्ता कृजगन् जल्पभिक्षकुट्टलुण्टवृङः षाकन् षकारस्य प्रत्ययस्या
दिषोयत् जल्पाकः भिक्षाकः कुट्टाकः लुण्टाकः वराकः सनाशंसभिक्ष उः चिकीर्षुः

ल॰
कौ॰
५१

आशेसः भिदुरः भञ्जभासमिदो घुरच् विद्युतोर्जिपृजुग्रावः स्तुवः क्विप् विभ्राट् भाः धुर्विहिंसायां
राल्लोपः रेफाच्छ्वोर्लोपः क्वौ झलादौ क्ङिति धूः विद्युत् ऊर्क् पूः दृशिग्रहणस्यापक
र्षणाज्जवतेर्दीर्घः । जूः ग्रावस्तुत् । क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसा
रणं च वक्तीति वाक् पृच्छतीति प्राट् आयतं स्तौतीति आयतस्तूः कटं प्रवते: कटप्रूः जुहो
तेः जूः श्रयति हरिं श्रीः दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे दाबादेस्त्र
न्करणेऽर्थे दाम्नेनेन दात्रं नेत्रं शिनत्रं तेनोसि शस्त्रं सेत्व पचांदस्मात्तामित्र शास्त्रं यो
त्रं स्तोत्रं सेत्रं सेक्त्रं मेढ्रं पत्रं दंष्ट्रा नद्ध्री अर्त्तिलूधूसूखनसहचर इत्रः अरित्रं वलि
त्रं सवित्रं खनित्रं सहित्रं चरित्रं पुवः संज्ञायां पवित्रं कृवापाजिमिस्वदिसाध्यशूभ्यः उ
ण् करोतीति कारुः वायुः पायुर्जायुर्मायुः स्वादुः साध्नोति परकार्यमि
ति साधुः आश्नुते शीघ्रमित्याशुः उणादयो बहुलं एते वर्तमाने संज्ञायां बहुलं स्युः के
चिदविहिता अप्यूह्याः संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे कार्याद्विद्यादनुबन्धमे
तच्छास्त्रमुणादिषु तुमुन्ण्वुलौ क्रियायां क्रियार्थायां क्रियायामुपपदे धातोरेतौ स्तः
मान्तत्वादव्ययत्वं कृष्णं द्रष्टुं याति कृष्णं दर्शको याति कालसमयवेलासु तुमुन् का
लः समयो वेला वा भोक्तुं भावे । सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् पाकः अ

51

कर्त्तरिचकारकेसंज्ञायां कर्त्तृभिन्नेकारकेघञ् घञिच भावकरणयोरञ्जेर्नलोपः रागः
अनयोः किं रज्यत्यस्मिन्निति रङ्गः निवासचितिशरीरोपसमाधानेष्वादेश्चकः एषुचिनोते
र्घञादेश्चकः उपसमाधानंराशीकरणं निकायः आकायः गोमयनिकायः एरच् इवर्णा
न्तादच् चयः जयः ऋदोरप् ऋवर्णान्तादुवर्णादप् करः गरः शरः यवः लवः स्तवः प
वः घञर्थेकविधानं प्रस्थः विघ्नः ड्वितःक्त्रिः क्त्रेर्मम्नित्यम् । क्त्रिप्रत्ययान्तान्मप्नित्यंस्या
पाकेननिर्वृत्तंपक्त्रिमं डुवप् उप्त्रिमं ट्वितोऽथुच् टुवेपृकम्पने वेपथुः श्वयथुः यजयाचय
तविच्छप्रच्छरक्षोनङ् यज्ञःयाच्ञा यत्नः विश्नः । शूडनुनासिकेच सनङ्क्षुस्वपस्वपशब्
द् प्रत्नादेशौस्तोऽनुनासिकेछ्वोश्चलोपोक्तिनिच विश्नः प्रश्नः रक्ष्णः स्वपोनन् स्वप्नः उप
सर्गेघोःकिः प्रधिः उपाधिः स्त्रियांक्तिन् स्त्रीलिङ्गेभावादौक्तिन् घञोऽपवादः कृतिः । ऋ
ल्वादिभ्यःक्तिः क्तिन्निष्ठावद्वाच्यः तेननत्वंकीर्णिः गीर्णिः लूनिः धूनिः पूनिः संपदादिभ्यः
क्विप् संपत् विपत् आपत् क्तिन्नपीष्यते संपत्तिः आपत्तिः विपत्तिः ऊतियूतिजूतिसा
तिहेतिकीर्त्तयश्च एतेनिपात्यन्ते ह्वःकाम् कृत्या । गावहृत्वः वात क्तिन् प्रकरणं प्रक्रि
यायकृतानि । इच्छा । इषेर्निपातोऽयं अप्रत्ययात्प्रत्ययान्तेभ्यः स्त्रियामकारः प्रत्ययः चिकीर्षा पु
त्रकाम्या । गुरोश्चहलः । गुरुमतोहलन्तात् स्त्रियामप्रत्ययः ईहा ऊहा ण्यासश्रन्थोयुच्

ल॰ कौ॰ ५२ 52

व् अस्यापवादाकारणा । नपुंसके भावे क्तः हसितं हसनं पुंसि संज्ञायां घः प्रायेण ।
छादेर्घेद्व्युपसर्गस्य । द्व्युपसर्गहीनस्य छादेर्ह्रस्वो घे दन्तच्छदः अद्व्येतिकिं समुच्छादः अङ्ग
र्देशस्मितितिप्रकारः अवे तॄस्त्रोर्घञ् अवतारः अवस्तारो जवनिकेत्यमरः हलश्च हलन्तात् घ
ञ् घापवादः रमन्ते योगिनोऽस्मिन्रामः अपमृज्यतेऽनेन व्याध्यादिकमपामार्गः ईषद्दुःसुषु कृच्छ्राकृ
च्छ्रार्थेषु खल् एषु: खसतोर्थेषूपपदेषु खल् तयोरेवेति भावे कर्मणि च कष्टे दुष्करः करो
भवता: ईषत्करो दुष्करो भवता: सुकरः । आतो युच् । खलोऽपवादः ईषत्पानः सोमो भवता दु
ष्पानः सुपानः । अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा प्रामाणिनिदेशार्थं प्रतिषेधार्थयोरलं
खल्वोरुपपदयोः क्त्वा दो दद्घोः अलं दत्त्वा घुमास्थेतीत्वं पीत्वा खलु अलं खल्वोः किं मा का
र्षीः प्रतिषेधयोः किमलंकारः । समानकर्तृकयोः पूर्वकाले । समानकर्तृकयोर्धात्वर्थ
योः पूर्वकाले विद्यमानाद्धातोः क्त्वा भुक्त्वा व्रजति द्वित्वमतन्त्रमकं स्नात्वा भुक्त्वा पीत्वा
व्रजति न क्त्वा सेट् क्त्वा किन्न शयित्वा सेट् किं कृत्वा रलो व्युपधाद्धलादेः संश्च इवर्णोवर्णो
वर्णोपधाद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः द्युतित्वा द्योतित्वा लिखित्वा लेखित्वा हला
देः किं एषित्वा सेट् किं भुक्त्वा उदितो वा व्युपधात् किं वर्तित्वा रलः किं सेवित्वा उदितः पर
स्य क्त्वा इड्वा शमित्वा शान्त्वा देवित्वा द्यूत्वा । दधातेर्हिः । हित्वा जहातेश्च हित्वा संगस्तदा

त्वा । समासेनञ्पूर्वेक्त्वोल्यप् । अनञ्पूर्वे पदे नञ्समासे क्त्वो ल्यबादेशः उत्क्रम्य प्रकृत्य अनत्य
विं अकृत्वा अव्ययपूर्वेमत्वालिंकिं परमकृत्वा अभीक्ष्ण्ये णमुल् च पौनःपुण्ये द्योते पदस्य द्वित्वं स्या
त् अभीक्ष्ण्ये गम्ये अव्ययसंज्ञकत्वादेते च स्मारंस्मारं नमति गुरुं स्मृत्वास्मृत्वा वा पायंपायं भोजं
भोजं श्रावंश्रावं अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् यथाकर्मणि णमुल् स्यात् सिद्धः प्रयो
गो यस्य एवंभूतश्चेत्कृञ् व्यर्थत्वात्प्रयोगानर्हः इत्यर्थः अन्यथा कारं एवं कारं कथं कारं इ
त्थंकारं इत्थं भुंक्ते इत्यर्थः सिद्धेति किं शिरोन्यथा कृत्वा भुंक्ते ॥ इति कृत्प्रक्रिया ॥
प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा । नियतोपस्थितिकः प्रातिपदिकार्थः
मात्रशब्दस्य प्रत्येकं योगः प्रातिपदिकार्थमात्रे लिंगमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात्
प्रातिपदिकार्थमात्रे उच्चैः नीचैः कृष्णः श्रीः ज्ञानं लिंगमात्रे तटः तटी तटं परिमाणमा
त्रे द्रोणो व्रीहिः वचनं संख्या एकः द्वौ बहवः । संबोधने च । हे राम । कर्तुरीप्सिततमं कर्म क
र्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् कर्मणि द्वितीया अनुक्ते कर्मणि द्वितीया स्या
त् हरिं भजति अभिहिते तु कर्मादौ प्रथमा हरिः सेव्यते लक्ष्म्या सेवितः अकथितं च अपा
दानादिविशेषैः अविवक्षितं कारकं कर्मसंज्ञं स्यात् दुह्याच्पच्दण्ड् रुधिप्रच्छिचिब्रूशासि
जिमथ्मुषाम् कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहां गां दोग्धि पयः बलिं याचते वसु

ल॰
कौ॰
५२

यं तंडुलानोदनंपचति गर्गांशतंदंडयति व्रजमवरुणद्धिगां माणवकंपंथानंपृच्छति वृ
क्षमवचिनोतिफलानि माणवकंधर्मंब्रूतेशास्तिवा शतंजयतिदेवदत्तं सुधांक्षीरनिधिंमथ्ना
ति देवदत्तंशतंमुष्णाति ग्राममजांनयतिहरति कर्षतिवहतिवा अर्थनिबंधनेयंसंज्ञा बलिंभि
क्षतेवसुधां माणवकंधर्मंभाषते अभिधत्तेवक्तीत्यादि स्वतंत्रःकर्तेतिकर्तृसंज्ञा। सा
धकतमंकरणं क्रियासिद्धौप्रकृष्टोपकारकंकरणंस्यात् कर्तृकरणयोस्तृतीया अनभिहिते
कर्तरिकरणेचतृतीयास्यात् रामेणबाणेनहतोवाली कर्मणायमभिप्रैतिसंप्रदानं दा
नस्यकर्मणायमभिप्रैतिसंप्रदानसंज्ञःस्यात् चतुर्थीसंप्रदाने विप्रायगांददाति नमःस्व
स्तिस्वाहास्वधालंवषड्योगाच्च एभिर्योगेचतुर्थी हरयेनमः प्रजाभ्यःस्वस्तिअग्नयेस्वा
हा पितृभ्यःस्वधा अलमितिपर्याप्त्यर्थग्रहणंतेनदैत्येभ्योहरिरलंप्रभुःसमर्थः शक्तइत्या
दि वषडिंद्राय ध्रुवमपायेपादानं अपायोविश्लेषस्तस्मिन्साध्येध्रुवमवधिभूतंकारकमपादानं अ
पादानेपंचमी ग्रामादायाति धावतोश्वात्पततीत्यादि षष्ठीशेषे कारकप्रातिपदिकार्थ
व्यतिरिक्तःस्वस्वामिभावादिसंबंधःशेषःतत्रषष्ठी राज्ञःपुरुषः कर्मादीनामपिसंबंधमात्रविव
क्षायांषष्ठ्येव सतांगतंसर्पिषोजानीते मातुःस्मरति एधोदकस्योपस्कुरुते भजेःशंभोश्च
रणयोः फलानांतृप्तः कर्तृकर्मणोःकृति कृद्योगेकर्तरिकर्मणिचषष्ठी कृष्णस्यकृतिःज

गतः स्मृतः आधारोऽधिकरणं कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं सप्तम्य-
धिकरणे च वा गाङ्गादिनिकार्थेभ्यः औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा कटे आस्ते
स्थाल्यां पचति मोक्षे इच्छास्ति सर्वस्मिन्नात्मास्ति वनस्पद्रेषु वर्धन्ते केवा इति विभक्त्यर्थः । स-
मासः पंचधा नञ्समस्तेन समासः स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः प्रायेण
पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः तत्पुरुष-
भेदः कर्मधारयः तद्भेदो द्विगुः प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः प्रायेणोभयप-
प्रधानोऽपरार्थो द्वंद्वः पंचमः समर्थः पदविधिः परसंबंधी यो विधिः समासाश्रितो बोध्यः सा
कूराणां समासः कष्टारः कर्मधारय इत्यन्तः प्राक्समास इत्यधिक्रियते सह सुपा सुप् सुपाम
न्तेन वा समस्यते समासत्वात्प्रातिपदिकत्वेन सुपो लुक् परार्थाभिधानं वृत्तिः कृत्तद्धितसमासै-
कशेषसनाद्यन्तधातुरूपाः पंच वृत्तयः वृत्त्यर्थावबोधकं वाक्यं विग्रहः स च लौकिकोऽलौकिको
श्चेति द्विधा न च पूर्वं भूत इति लौकिकं विग्रहार्थं पूर्वं अम् भूत सु इति लौकिकः नञ्समासे कृ-
ते भूतपूर्वं चरट् इति निपातनात् शब्दस्य पूर्वनिपातः भूतपूर्वः एवं नित्यसमासो विभक्त्य-
लोपश्च वागर्थाविव इति केवलसमासः अव्ययीभावः अधिकारोऽयं प्राक्तत्पुरुषात् अ-
व्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रति शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसा

दृश्यसंपत्तिसाकल्यान्तवचनेषु विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते अ
विग्रहो नित्यसमासः अस्वपदविग्रहो वा विभक्तौ हरि ङि अधि इति स्थिते प्रथमानिर्दिष्टं समा
स उपसर्जनं समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनं स्यात् उपसर्जनं पूर्वं समासे उपसर्जनं प्रा
क्प्रयोज्यमित्यर्थः प्राक्प्रयोगः सुपो लुक् एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकसंज्ञायां
स्वाद्युत्पत्तिः अव्ययीभावश्चेत्यव्ययत्वात्सुपो लुक् एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकसं
ज्ञायां स्वाद्युत्पत्तिः अधिहरि नाव्ययीभावादतोऽम्त्वपंचम्याः अदन्तादव्ययीभावात्सुपो न लु
क् तस्य पंचमीं विनाऽमादेशः कृष्णस्य समीपमुपकृष्णं तृतीयासप्तम्योर्बहुलं अदन्तादव्ययी
भावादम्भावः उपकृष्णेनोपकृष्णं उपकृष्णे उपकृष्णं मद्राणां समृद्धिः सुमद्रं यवनानां व्यृद्धिः
दुर्यवनं अव्ययीभावश्च नपुंसकं मक्षिकाणामभावो निर्मक्षिकं हिमस्यात्ययोऽतिहिमं नि
द्रा संप्रति न युज्यते इति अतिनिद्रं हरिशब्दस्य प्रकाश इति हरि विष्णोः पश्चादनुविष्णु योग्यतावीप्सा
पदार्थानतिवृत्तिसादृश्यानि यथार्थाः रूपस्य योग्यमनुरूपं अर्थमर्थं प्रति प्रत्यर्थं शक्तिमनति
क्रम्य यथाशक्ति अव्ययीभावे चाकाले सहस्य सः स्यादव्ययीभावे न तु काले हरेः सादृश्यं सह
रि ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं चक्रेण युगपदिति सचक्रं सदृशः सख्या ससखि क्षत्राणां संपत्तिः
सक्षत्रं तृणमप्यपरित्यज्य सतृणमत्ति अग्निग्रन्थपर्यन्तमधीते साग्नि नदीभिश्च संख्या वा समस

स्यतेसमाहारेचायमिष्यते पंचगंगं द्वियमुनम् तद्धिताः आपंचमसमाप्तेरधिकारोयं
अव्ययीभावेशरत्प्रभृतिभ्यः शरदादिभ्यष्टच् स्यात्समासान्तोऽव्ययीभावे शरदः समीपंउप
शरदं प्रतिविपाशं जरायाजरश्च उपजरसमित्यादि अनश्च अन्नन्तादव्ययीभावात् टच्
नस्तद्धिते नान्तस्यभस्यटेर्लोपस्तद्धिते उपराजं अध्यात्मं नपुंसकादन्यतरस्यां अन्नन्तंय
त्क्लीबंतदन्तादव्ययीभावात् टच् वा उपचर्मं उपचर्म झयः झयन्तादव्ययीभावात् टच्
वा उपसमिधं उपसमित् इत्यव्ययीभावः। तत्पुरुषः अधिकारोयंप्राग्बहुव्रीहेः द्विगु
श्च तत्पुरुषसंज्ञकः द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयान्तंश्रितादि
प्रकृतिकैः सुबन्तैस्सहवासमस्यते कृष्णंश्रितः कृष्णश्रितइत्यादि तृतीयातत्कृतार्थेनगुण
वचनेन तृतीयान्तंतृतीयान्तार्थकृतगुणवाचिनार्थेनचसहप्राग्वत् शंकुलयाखण्डः शंकुला
खण्डः धान्येनार्थोधान्यार्थः तत्कृतेनकिं ग्रहणकारणं कर्तृकरणेकृताबहुलं कर्तरिक
करणेच तृतीयाकृदन्तेनबहुलंप्राग्वत् हरित्रातः नखभिन्नः कृद्ग्रहणेगतिकारकपूर्व
स्यापिग्रहणं नखनिर्भिन्नः चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यन्तंतदर्था
र्थादिभिश्चतुर्थ्यन्तंवाप्राग्वत् यूपायदारुयूपदारु तदर्थेनप्रकृतिविकारभावएवेष्टः
तेनेह न रन्धनायस्थाली अर्थेननित्यसमासोविशेष्यलिंगताचेतिवक्तव्यं द्विजायायं द्वि

ल० नार्थः सूपः द्विजार्था यवागूः द्विजार्थं पयः भूतबलिः गोहितं गोसुखं गोरक्षितं पंच
कौ० मी भयेन चोराद्भयं चोरभयं स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन पंचम्याः स्तोकादिभ्यः अ
४५ लुक् उत्तरपदे परतः स्तोकान्मुक्तः अल्पान्मुक्तः अन्तिकादागतः स्तोकान्मुक्तः अभ्या
45 शादागतः दूरादागतः कृच्छ्रादागतः षष्ठी सुबन्तेन प्राग्वत् राज्ञः पुरुषः राजपुरुषः
पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे अवयविना सह पूर्वादयः समस्यन्ते एकत्व
संख्याविशिष्टश्चेदवयवी षष्ठीसमासापवादः पूर्वं कायस्य पूर्वकायः एकाधिकरणे
किं पूर्वः छात्राणां चार्थे द्वन्द्वः समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः तत्रे
श्वरं गुरुं च भजस्वेति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः भिक्षामट गां चा
नयेत्यन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः अनयोरसामर्थ्यान्न समासो न भवति धवखदिरौ छि
न्धीति मिलितानामन्वय इतरेतरयोगः संज्ञापरिभाषमिति समूहः समाहारः राजद
न्तादिषु परं एषु पूर्वप्रयोगार्हं परं स्यात् दन्तानां राजा राजदन्तः धर्मादिष्वनियमः अ
र्थधर्मौ धर्मार्थावित्यादि द्वन्द्वे घि पूर्वं स्यात् हरिहरौ अजाद्यदन्तं ईशकृष्णौ अल्पा
च्तरं शिवकेशवौ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानां एषां द्वन्द्व एकवत् पाणिपादं मार्दङ्गिक
पाणविकं रथिकाश्वारोहं सर्वो द्वन्द्वो विभाषैकवद्भवति द्वन्द्वाच्चुदषहान्तात्समाहारे

वाक्कचं त्वक्स्रजं शमीदृषदं वाक्त्विषं छत्रोपानहं समाहारेकिं प्राक्इप्रावदो इतिद्वंद्वः अव
पूर्वर्धं पद्यामनंदौ अगांतस्य समासस्य अप्रत्ययांतःपूर्ववः अतेतथा अत्लादेत्तस्मात अर्धर्चः प्रत्व
बहुवः सपेनतेदेनवनेहस्त्रत्वत्तामबह्नु बह्नूचं विस्पष्टं विमलापतरः ह्रुनउपसर्गेभ्योपद्दृन्‌ दीर्घं
अंतरीपं समीपं अवर्णांताद्वा प्रेपं प्रापं ऽस्तोदेशो अनूपोदेशः राजधुरं अदेत्त अदधूः हठ
इत्तः सविपथः स्वपथः अतोदर्शनात्‌ अवसपर्यायाद्दोणवस्मात्तगवामतीवगवात्ता
उपसर्गादेधनः प्रागतोध्वानं प्राधोरध्यः नञ्जनात्‌ तृजनार्थान्येभ्यः समासांतानस्य ह्मार
नाअनिरानास्वनिष्पाववेवनेहपरमराजः मध्योविभाषा न्यूर्वान्यथोवासमासांतः अपथं
अपंथाः इतिसमासांतः समर्थानांप्रथमाद्वा इदमपत्यिक्रियतेप्रागदिश्यपयावत प्रागदेव्यतेः
एर्नेनेदेव्यतीतितनः प्राग्‌णपत्यिक्रियतेअव्यपत्यादिभ्यश्च अश्वपतेरपत्यादि आश्वपतं
गाणपतं । दित्यादित्यपत्युत्तरपदाण्यः प्रागदीव्यतीयेष्वर्थेषु दितेरपत्यादिदैत्यः अदिते
रादित्यस्यवा आदित्यः प्राजापत्यः देवाद्यञञौ दैव्यं दैवं बहिषष्टिलोपोयञ्च बाह्यः ई
कक्च किनिव अव्ययादेनचोद्भिः कितिनद्धिते वाहीकः गोरजादिप्रसंगेयत्‌ गोरप
त्यादिविकारोनाप्योःप्रत्ययाः स्त्रीपुंसाभ्यांनञ्स्नञौभवनात्‌ प्राग्भवनाद्भवनइत्यतः प्रागर
यैर्थाभ्यामेतौस्तः स्त्रैणः पौंस्नः तस्यापत्यं सहंतात्तनंसपेः समर्थादपत्येर्थे उजावस

मान्नञ्स्नञौ स्तः ओर्गुणः उवर्णान्तस्य भस्य गुणस्तद्धिते उपगोरपत्यमौपगवः आश्व
पतः दैत्यः औत्सः स्त्रैणः पौंस्नः अपत्यं पौत्रप्रभृति गोत्रं अपत्यत्वेन विवक्षितं पौत्रादि गो
त्रसंज्ञं स्यात् एको गोत्रे गोत्रे एक एवापत्यप्रत्ययः स्यात् उपगोर्गोत्रापत्यमौपगवः गर्गादिभ्यो यञ्
गोत्रापत्ये गर्गस्य गोत्रापत्यं गार्ग्यः वात्स्यः यञञोश्च गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेत
योर्लुक् तत्कृते बहुत्वे न तु स्त्रियां गर्गाः वत्साः जीवति तु वंश्ये युवा वंश्ये पित्रादौ जीवति पौ
त्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात् गोत्राद्यून्यस्त्रियां यून्यपत्ये गोत्रप्रत्ययान्तादेव
प्रत्ययः स्यात् स्त्रियां तु न युवसंज्ञा यञिञोश्च गोत्रे यौ यञिञौ तदन्तात् फक् आयनेयीनीयियः
फढखछघां प्रत्ययादीनां प्रत्ययादेः फस्य आयन् ढस्य एय् खस्य ईन् छस्य ईय् घस्य इय् स्युः गा
र्ग्यस्य युवापत्यं गार्ग्यायणः दाक्षायणः अत इञ् अपत्येऽर्थे दाक्षिः बाह्वादिभ्यश्च बाहविः औ
डुलोमिः लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः बाह्वादेराकृतिगणः उडुलोमाः अनृष्यान
न्तर्ये बिदादिभ्योऽञ् ये त्वत्रानृषयस्तेभ्योऽपत्येऽन्यत्र गोत्रे बिदस्य गोत्रं बैदः बै
दौ बिदाः पुत्रस्यापत्यं पौत्रः पौत्रौ यञिञोश्चेति सूत्रे पुनरध्यायमाश्रितं गोत्रं तेनेह न पौ
त्राः एवं दौहित्रादयः शिवादिभ्योऽण् अपत्ये शैवः गाङ्गः ऋष्यन्धकवृष्णिकुरुभ्यश्च ऋषिभ्यः
वासिष्ठः वैश्वामित्रः अन्धकेभ्यः श्वाफल्कः वृष्णिभ्यः वासुदेवः कुरुभ्यः नाकुलः साह

देवः मातुरुत्संख्यासंभद्रपूर्वायाः संख्यादिपूर्वस्य मातृशब्दस्य उरादेशः स्यात् अणप्रत्य
यश्च द्वैमातुरगणाधिपः इत्यर्थः षाण्मातुरः शक्तिधरः इत्यर्थः सांमातुरः भाद्रमातुरः
स्त्रीभ्यो ढक् स्त्रीप्रत्ययान्तेभ्यो ढक् वैनतेयः कन्यायाः कनीन च बादरायण कानीनो व्यासः क-
र्णश्च राजश्वशुराद्यत् राज्ञो जातावेव ये चाभावकर्मणोः यादौ तद्धितेऽन्यत्र कृत्यास्यात्र
न्भावकर्मणोः राजन्यः जातावेवेति किं अन्यत्र राजन्यानि परे राजानः श्वशुर्यः क्षत्रियः
राज्ञो जातावेव क्षात्रिरन्यः रेवत्यादिभ्यष्ठक् ठस्येकः अंगात्परस्य ठस्येकादेशः रैवतिकः
क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् पंचालानां राजा पांचालः शूरसेन सौ-
रसः सौरसेनः पौंड्रः कुरुणादिभ्यो ण्यः कौरव्यः नैषध्यः ते तद्राजाः अण्यादयस्तद्राजसं-
ज्ञास्युः तद्राजस्य बहुषु तेनैवास्त्रियां बहुष्वर्थेषु तद्राजस्य लुक् तत्कृते बहुत्वे न तु स्त्रियां
पंचाला इत्यादि कंबोजाल्लुक् कंबोजः कंबोजौ कंबोजादिभ्य इति वक्तव्यं चोलः शकः
केरलः यवनः इत्यपत्याधिकारः तेन रक्तं रागात् कषायेण रक्तं वासः काषायं नक्षत्रेण
युक्तः कालः तिष्यपुष्ययोर्नक्षत्राणि यलोपः पुष्येण युक्तं पौषमहः लुबविशेषे पूर्वेण
विहितस्य लुप् षष्टिदंडात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते अद्य पुष्यः दृष्टं साम
तेनेत्येव वसिष्ठेन दृष्टं वासिष्ठं साम वामदेवाड्ड्यड्ड्यौ वामदेवेन दृष्टं साम वामदेव्यम् परि-

हृतोऽध्यः वह्निराणापरिहृतो वाहीकोऽध्यः ततोऽप्युद्धृतममत्रेभ्यः शरावे उद्धृतः शारावः ओदनः
संस्कृतं भक्षाः सप्तम्यन्तादणस्यात् संस्कृतेऽर्थे यत्संस्कृतं भक्षाः सप्तम्यन्तादणस्यात् संस्कृ
तेऽर्थे यत्संस्कृतं भक्ष्याश्चेत् भ्राष्ट्रेषु संस्कृताः भ्राष्ट्रा यवाः साऽस्य देवता इन्द्रो देवताऽस्येति ऐन्द्रं
हविः पाशुपतं बार्हस्पत्यं शुक्राद्घन् शुक्रियं सोमाट्ट्यण् सौम्यम् वाय्वृतुपित्रुषसो यत्
वायव्यं ऋतव्यं रीङृतः अकृद्यकारे असार्वधातुके यकारे च्वौ च परे ऋतो रीङादेशः यस्येति च पि
त्र्यं उषस्यम् पितृव्यमातुलमातामहपितामहाः एते निपात्यन्ते पितुर्भ्राता पितृव्यः मातु
र्भ्राता मातुलः मातुः पिता मातामहः पितुः पिता पितामहः तस्य समूहः काकानां स
मूहः काकं भिक्षादिभ्योऽण् भैक्षं गर्भिणीनां समूहो गार्भिणं इह भस्याढे तद्धिते पुंवद्भा
वाद्वइति पुंवद्भावे कृते इनण्यनपत्ये अनपत्यार्थे न नस्तद्धिते इति टिलोपो न युवतीनां
समूहो यौवतं ग्रामजनबन्धुभ्यस्तल् तलन्तं स्त्रियां ग्रामता जनता बन्धुता गजसहाया
भ्यां चेति वक्तव्यं गजता सहायता अह्नः खः क्रतौ अह्नष्टखोरेवेति टिलोपः अह्नः समूहस्सा
ध्यः अहीनः अचित्तहस्तिधेनोष्ठक् इसुसुक्तान्तात्कः इस् उस् उक् त इत्येतदन्तात्परस्य ठ
स्य कः साक्तुकं हास्तिकं धैनुकं । तदधीते तद्वेद । न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामै
च् पदान्ताभ्यां य्वाभ्यां परस्य न वृद्धिः किं तु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः व्याकरण

मधीते वेत्ति वा वैयाकरणः क्रमादिभ्यो वुन् क्रमकः शिक्षकः मीमांसकः तदस्मिन्नस्तीति दे
शे नाम्नि उदुंबरः संत्यस्मिन् देशे उदुंबरो देशः तेन निर्वृत्तं कुशांबेन निर्वृत्ता कौशांबी नगरी
तस्य निवासः शिबीनां निवासो देशः शैबः अदूरभवश्च विदिशाया अदूरभवं नगरं वैदिशं
जनपदे लुप् जनपदे वाच्ये चातुरर्थिकस्य लुप् लुपि युक्तिवद्व्यक्तिवचने लुपि सति प्रकृ
तिवल्लिंगवचने स्तः पंचालानां जनपदो निवासः जनपदः पंचालाः कुरवः अंगाः वंगाः
कलिंगाः वरणादिभ्यश्च अजनपदार्थ आरंभः वरणानामदूरभवं नगरं वरणाः कुमुदनड
वेतसेभ्यो ड्मतुप् डपः डपेन्तात्कतोन्त्यस्वरः कुमुद्वान् नड्वान् मादुपधायाश्च मतोर्वोऽयवा
दिभ्यः मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः वेतस्वान्
नडशादाड्ड्वलच् नड्वलः शाद्वलः शिखाया वलच् शिखावलः इति चातुरर्थिकाः शेषे
अपत्यादिचतुरर्थ्यान्तादन्योऽर्थः शेषस्तत्राणादयः स्युः चक्षुषा गृह्यते चाक्षुषं रूपं श्रावणः
शब्दः औपनिषदः पुरुषः दृषदि पिष्टा दार्षदाः सक्तवः उलूखले क्षुण्ण औलूखलो यावकः
अश्वैरुह्यते आश्वो रथः चतुर्भिरुह्यते चातुरं शाकटं चतुर्दश्यां दृश्यते चातुर्दशं रक्षः तस्य
विकार इत्यतः प्राक् शेषः विकारः राष्ट्रावारपाराद्घखौ अभ्यां च रोऽन्तः राष्ट्रजातादि राष्ट्रि
यः अवारपारीणः अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यं अवारीणः पारीणः

ल. पारावारीणः इह प्रकृतिविशेषाद्घादयष्ट्युट्युलन्ताः प्रत्यया उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थवि
कौ. भक्तयश्च वक्ष्यन्ते ग्रामाद्यखञौ ग्राम्यः ग्रामीणः नद्यादिभ्यो ढक् नादेयं माहेयं वाराणसेयं
५८ दक्षिणापश्चात्पुरसस्त्यक् दाक्षिणात्यः पाश्चात्यः पौरस्त्यः द्युप्रागपागुदक्प्रतीचो यत् दिव्यं प्रा
58 च्यं अपाच्यं उदीच्यं प्रतीच्यं कन्थायाष्ठक् कान्थिकः अव्ययात्त्यप् अमेहक्वतसित्रेभ्य एव अमा
त्यः इहत्यः क्वत्यः ततस्त्यः तत्रत्यः त्यब्नेर्ध्रुवे नित्यः वृद्धिर्यस्याचामा
दिस्तद्वृद्धं यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् त्यदादीनि च वृद्धसंज्ञानि
स्युः वृद्धाच्छः शालीयः तदीयः वा नामधेयस्य वृद्धसंज्ञा देवदत्तीयः दैवदत्तः गहादिभ्यश्च
गहीयः युष्मदस्मदोरन्यतरस्यां खञ् च वा छः पक्षेऽण् युवयोर्युष्माकं वा युष्मदीयः अस्मदीयः त
स्मिन्नणि च युष्माकास्माकौ युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च यौष्माकीणः आस्माकीनः
यौष्माकः आस्माकः तवकममकावेकवचने एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः
खञ्यणि च तावकीनः तावकः मामकीनः मामकः छे तु प्रत्ययोत्तरपदयोश्च मपर्यन्तः
योरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये उत्तरपदे च त्वदीयः मदीयः त्वत्पुत्रः मत्पुत्रः मध्या
न्मः मध्यमः कालाट्ठञ् मासिकं सांवत्सरिकं अव्ययानां भमात्रे टिलोपः सायंप्रातिकः पौ
नःपुनिकः प्रावृष एण्यः प्रावृषेण्यः सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् सन्धिवेलायां भवं सान्धिवे

ले ग्रैष्मं नैशं त्रिष्वपुष्पयोरितियलोपः सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्लौतुट्च सायमि
त्यादिचतुर्भ्योऽव्ययेभ्यश्चकालवाचिभ्यः ट्युट्लौ तयोस्तुट्च प्रागनादेशः सायंतनं चिरंतनं
प्राह्णप्रगयोरेत्वंनिपात्यते प्राह्णेतनं प्रगेतनं दोषातनं दिवातनं तत्रजातः सप्तमीस
मर्थाज्जातइत्यर्थेऽणादयोयथाविधिस्युः स्रुघ्नेजातः स्रौघ्नः औत्सः राष्ट्रियः अवारपारीणइ
त्यादि प्रावृषष्ठक एण्यस्यापवादः प्रावृषिकः सायभवः नेत्रमेव स्रुघ्नेप्रायेणबाहुल्येन
भवति स्रौघ्नः संभूते स्रुघ्नेसंभवतिस्रौघ्नः कोशाड्ढञ् कौशेयंवस्त्रम् तत्रभवः स्रौघ्नः औ
त्सः राष्ट्रियः दिगादिभ्योयत् दिश्यंपवर्ग्यं शरीरावयवाच्च दंत्यं कंठ्यं अध्यात्मादेष्ठञि
ष्यते आध्यात्मिकंभवमाध्यात्मिकं अनुशातिकादीनांच एषामुभयपदवृद्धिः ऐतिणीतिके
तिच आधिदैविकं आधिभौतिकं ऐहलौकिकं पारलौकिकं आकृतिगणोयं जिह्वामूला
ङ्गुलेश्छः जिह्वामूलीयं वर्गान्तस्य कवर्गीयं ततआगतः स्रुघ्नादागतः स्रौघ्नः ठगायस्थाने
भ्यः शुल्कशालायाआगतः शौल्कशालिकं विद्यायोनिसंबन्धेभ्योवुञ् औपाध्यायकः पै
तामहकः हेतुमनुष्येभ्योऽन्यतरस्यांरूप्यः समादागतंसमरूप्यं पक्षेगहादिवाच्छः समीयं
देवदत्तरूप्यं देवदत्तीयं हेतौपंचमी मयट्च सममयं देवदत्तमयं प्रभवतिहिमवतः प्रभ
वतिहैमवतीगंगा तद्गच्छति पथिदूतयोः स्रुघ्नंगच्छतितिस्रौघ्नः पंथाद्गूतोवा अभिनिः

ल॰ कौ॰ ५५ 49

ष्क्रामति द्वारं स्रुघ्नमभिनिष्क्रामतीति स्रौघ्नं कान्यकुब्जद्वारं अधिकृत्य कृते ग्रंथे शारीरकमभि
कृत्य कृतो ग्रंथः शारीरकीयः सोऽस्य निवासः स्रुघ्नो निवासोऽस्य स्रौघ्नः तेन प्रोक्तं पाणिनिना प्रो
क्तं पाणिनीयं तस्येदं उपगोरपत्यं औपगव इति शैषिकाः तस्य विकारः अश्मनो विकारे टि
लोपः अश्मनो विकारः आश्मः भास्मनः मार्त्तिकः अवयवे च प्राण्योषधिवृक्षेभ्यः चाद्वि
कारे मयूरस्य विकारोऽवयवो वा मायूरः मौर्वं काण्डं भस्म विकारं पैप्पलं मयड्वैतयोर्भाषायाम
भक्ष्याच्छादनयोः प्रकृतिमात्रान्मयट् वा स्याद्विकारावयवयोः अश्ममयं आश्मनं अभक्ष्या
दि किं मौद्गः सूपः कार्पासमाच्छादनं नित्यं वृद्धशरादिभ्यः आम्रमयं शरमयं गोश्च पुरीषे
गोमयं गोपयसोर्यत् गव्यं पयस्यं इति प्राग्दीव्यतीयाः प्राग्वहतेष्ठक् तद्वहतीत्यतः प्राक्
ठक् अधिक्रियते तेन दीव्यति खनति जयति जितं अक्षैर्दीव्यति खनति जयति जितं वा आक्षि
कः संस्कृतं दध्ना संस्कृतं दाधिकं मारीचिकं तरति उडुपेन तरति औडुपिकः चरति हस्तिना
चरतीति हास्तिकः दध्ना चरति दाधिकः संसृष्टे दध्ना संसृष्टं दाधिकं उञ्छति बदराण्युञ्छति बाद
रिकः रक्षति समाजं रक्षति सामाजिकः शब्ददर्दुरं करोति दार्दुरिकः धर्मं चरति धार्मिकः
धर्माच्चेति वक्तव्यं आधर्मिकः शिल्पं मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः प्रहरणम् असिः प्रह
रणमस्य आसिकः धानुष्कः शीलं अपूपभक्षणं शीलमस्य आपूपिकः छत्रादिभ्यो णः छ

रोर्दोषाणामावरणं छत्रं तच्छीलमस्येति छात्रः तत्र नियुक्तः आकारनियुक्त आकारिकः निर्
वृत्तेष्वसतिनैकटिको भिक्षुः इति ठगधिकारः । प्राग्घिताद्यत् तस्मै हितमित्यतः प्राग्यदधिक्रि
यते तद्वहति रथयुगप्रासंगं रथं वहति रथ्यः युगं वहति युग्यः धुरो यड्ढकौ धुर्यः धौरेयः नौ
वयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु नावा
तार्यं नाव्यं वयसा तुल्यो वयस्यः धर्मेण प्राप्यं धर्म्यं विषेण वध्यो विष्यः मूलेन आनाम्यं मूल्यं
मूलेन समो मूल्यः सीतया समितं सीत्यं क्षेत्रं तुलया संमितं तुल्यं तत्र साधुः सामसु साधुः सा
मन्यः कर्मण्यः शरण्यः सभायां यः सभ्यः इति यतोऽवधिः प्राक्क्रीताच्छः तेन क्रीत
मित्यतश्छोऽधिक्रियते उगवादिभ्यो यत् उवर्णान्ताद्गवादिभ्यश्च यत् छस्यापवादः गव्यं हवि
ष्यं तस्मै हितं वत्सेभ्यो हितो वत्सीयो गोधुक् अकङ्ग्रेशाह गवां हविष्यं शरीरावयवाद्यत् द
न्त्यं कण्ठ्यं नस्यं आत्मन्विश्वजनभोगोत्तरपदात्खः आत्माध्वानौ खे प्रकृत्यास्तः आ
त्मनीनं हितमात्मनीनं विश्वजनीनः मातृभोगीणः ऋपतोश्शणौ विधिः प्राग्वतेष्ठञ् ते
नातुल्यमित्यतः प्राक् ठञधिक्रियते अर्हीदगोपुच्छसंख्यापरिमाणाट्ठक् तेन क्रीतं वत् सम
स्मात्क्रीतं सामतिकं प्रास्थिकं तस्येश्वरः सर्वभूमिपृथिवीभ्यामणञौ आस्तः अनुशतिकादीनां च
सर्वभूमेरीश्वरः सार्वभौमः पार्थिवः पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशी

ल. कौ. ५०

50

निवचतिपातं पचेशुचिशाच्छ्रियांस्त्वेते तदर्हति छेदादिभ्यो नित्यमर्हतीति योगः शैर्षच्छेदिकः दण्डा
दिभ्यः यद्भ्योऽयत् दण्डमर्हतीति दण्ड्यः अर्घ्यः वध्यः इति ठञोऽवधिः तेन तुल्यं क्रिया चेद्वतिः ब्राह्मणे
न तुल्यं ब्राह्मणवदधीते क्रिया चेत् किं गुणतुल्ये मा भूत् पुत्रेण तुल्यः स्थूलः तत्र तस्येव मथु
रायामिव मथुरावत् स्रुघ्ने प्राकाराः चैत्रस्येव चैत्रवत् मैत्रस्य गावः तस्य भावस्त्वतलौ प्रकृति
जन्यबोधे प्रकारो भावः गोर्भावो गोत्वं गोता त्वान्तं स्त्रियां क्लान्तं क्लीबं आ च त्वात् ब्राह्मणस्त्व
इत्यतः प्राक् त्वतलावधिक्रियेते अपवादैः सह समावेशार्थमिदं चकारो नञ्स्नञ्भ्यामपि स
मावेशार्थमिदं स्त्रियो भावः स्त्रैणं स्त्रीत्वं स्त्रीता पौंस्नं पौंस्त्वं पुंस्ता पृथ्वादिभ्य इमनिज्वा वा
वचनसमाधिसमावेशार्थं र ऋतो हलादेर्लघोः टेरिष्ठेमेयःसु टेर्लोपः इष्ठेमेयःसु पृथुमृदुभृशकृ
शदृढपरिवृढानामेव रत्वं पृथोर्भावः प्रथिमा इमनिज्भ्यां लघुपूर्वात् अण् पार्थिवं प्रथिम
मा मार्दवं वर्णदृढादिभ्यः ष्यञ्च वा इमनिच् शौक्ल्यं शुक्लिमा दार्ढ्यं द्रढिमा गुणवचन
ब्राह्मणादिभ्यः कर्मणि च जाड्यं जडस्य भावः कर्म वा जाड्यं मौढ्यं ब्राह्मण्यं आकृतिगणोऽयं
सख्युर्यः सख्यं कपिज्ञात्योर्ढक् कापेयं ज्ञातेयं पत्यन्तपुरोहितादिभ्यो यक् सैनापत्यं पौरोहित्यं
इति तद्धिते पञ्चमोऽधिकारः धान्यानां भवने क्षेत्रे खञ् मुद्गानां भवनं क्षेत्रं मौद्गीनं व्रीहिशाल्योर्ढक्
व्रैहेयं शालेयं हैयङ्गवीनं संज्ञायाम् नवनीते निपात्यतेऽयं तदस्य संजातं तारकादिभ्य इतच् ता

रकः संज्ञातं ग्रस्य तारकितं नभः पंडितः अकातितोऽयं प्रमाणे द्वयसज्दघ्नञ्मात्रचः ऊरुप्रयनंदे
माणमस्य ऊरुद्वयसं ऊरुदघ्नं ऊरुमात्रं यत्तदेतेभ्यः परिमाणे वतुप् यत्परिमाणमस्य यावान् ता
वान् एतावान् संख्याया अवयवे तयप् पंचावयवा अस्य पंचतयं द्वित्रिभ्यां तयस्यायज्वा द्वयं
द्वितयं त्रयं त्रितयं उभादुदात्तो नित्यं उभशब्दात्तयपोऽयच् स्यात् सचाद्युदात्तः उभयं तस्य पूर
णे डट् एकादशानां पूरण एकादशः नान्तादसंख्यादेर्मट् डटो मडागमः पंचानांपूरणः पंचा
नांपूरणः पंचमः नान्तात्किं नविंशोऽडिति विंशतेर्भस्यतिशब्दलोपो डितिपरे विंशः असंख्या
देः किं एकादशः षट्कतिकतिपयचतुरां थुक् इति षण्णांपूरणः षष्ठः कतिपयशब्दस्यानप
वडट् कतिपयथः द्वेस्तीयः डटोऽपवादः द्वयोः पूरणो द्वितीयः त्रेः संप्रसारणं च तृतीयः श्रो
त्रियं छंदोऽधीते श्रोत्रियः वेत्यनुवृत्तेश्छांदसः पूर्वादिनिः पूर्वं कृतमनेन पूर्वी सपूर्वाच्च कृत
पूर्वी इष्टादिभ्यश्च इष्टमनेन इष्टी अधीती तदस्यास्त्यस्मिन्निति मतुप् गावोऽस्यासन्त्यस्मिन्वा संति गो
मान् तसौ मत्वर्थे तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये संप्रसारणं विदुष्मान् गुणवचनेभ्यो
मतुपो लुगिष्टः शुक्लो गुणोऽस्यास्तीति शुक्लः पटः कृष्णः प्राणिस्थादातो लजन्यतरस्याम् चूडालः
चूडावान् प्राणिस्थात्किं शिखावान् दीपः प्राण्यंगादेवेह मेधावान् लोमादिपामादिपिच्छा
दिभ्यः शनेलचः लोमादिभ्यःशनेलचः लोमाविशः पामादिभ्यो नः पामनः अंगात्कल्याणे

ल॰ कौ॰ ५१ 51

अंगना लक्ष्म्याश्च लक्ष्मणः पिच्छादिभ्यइलच् पिच्छिलः पिच्छावान् दंतउन्नतउरच् उन्नतादं
ताअस्यदंतुरः केशाद्वोन्यतरस्याम् केशवः केशवान् अन्येभ्योपिदृश्यते मणिवः अर्णसो
लोपश्च अर्णवः अतइनिठनौ दंडी दंडिकः व्रीह्यादिभ्यश्च व्रीही व्रीहिकः अस्मायामेधास्र
जोविनिः यशस्वी यशस्वान् मायावी मेधावी स्रग्वी वाचोग्मिनिः वाग्मी अर्शआदिभ्योच्
अर्शसः आकृतिगणोयं इतिमत्वर्थीयाः प्राग्दिशोविभक्तिः दिक्शब्देभ्यः इत्यतःप्राग्वक्ष्य
माणाः प्रत्ययाविभक्तिःसंज्ञाःस्युः अथस्वार्थिकाः किंसर्वनामबहुभ्योद्व्यादिभ्यः किमः स
र्वनाम्नोबहुशब्दाच्चेतिप्राग्दिशोधिक्रियते पंचम्यास्तसिल् पंचम्यंतेभ्यः तसिल् वास्यात्
कुतिहोः किमः कुस्यात् तादौहादौचविभक्तौ कुतः अस्मात् इदमइश प्राग्दिशीयेइतः
एतदोअन् एतदः प्राग्दिशीयेइतः अनेकाल्त्वात्सर्वादेशः अतः अमुतः यतः ततः बहुतः द्व्या
देस्तु द्वाभ्यां पर्यभिभ्यांच तसिल् परितःसर्वतइत्यर्थः अभितउभयतइत्यर्थः सप्तम्यास्
त्रल् कुत्र यत्र बहुत्र इदमोहः इशोपवादः इह किमोत् वास्यात् क्वाति किमःक्व कुत्र
इतराभ्योपिदृश्यंते पंचमीसप्तमीतरविभक्त्यंतादपितसिलादयोदृश्यंते दृशिग्रहणाद्भ
वदादियोगएव सभवान् ततोभवान् तत्रभवान् तंभवंतं ततोभवंतं तत्रभवंतं एवंदी
र्घायुः देवानांप्रियः आयुष्मान् सर्वैकान्यकिंयत्तदःकालेदा सप्तम्यंतेभ्यएभ्यः काला

ऽधैरा स्यात् सर्वैकान्यकिंयत्तदस्यो दिशादेः प्राग्दिशीयो सर्वस्य सो वा सर्वस्मिन्काले सदा सर्वदा प
कदा अन्यदा कदा यदा तदा काले किं सर्वत्रेदेशे इदमो हिल् सप्तम्यंतात् एतेतौ रथोः इ
दमः एतौ स्तः रेफादौ थकारादौ च प्राग्दिशीये परे अस्मिन्काले एतर्हि काले किं इहदेशे अथ
ना इदमो निपातोयं दानींच इमोदानीं प्रत्ययः काले इदानीं तदोदाच तदा तदानीं अनद्
यतने र्हिल् न्यतस्यात् कर्हि कदा यर्हि यदा तर्हि तदा एतदः एत इत् एतौ स्तो रेफादौ थादौ
च प्राग्दिशीये एतस्मिन्काले एतर्हि प्रकारवचने थाल् प्रकारवृत्तिभ्यः किमादिभ्यः थाल् ते
न प्रकारेण तथा यथा इदमस्थमुः थालोपवादः एतदोपि वाच्यः अनेन एतेन वा प्रकारे
ण इत्थं किमश्च केन प्रकारेण कथं इति प्राग्दिशीयाः अतिशायने तमबिष्ठनौ अतिशयविशि
ष्टार्थवृत्तेः स्वार्थे एतौ स्तः अयमेषामतिशयेनाढ्यः आढ्यतमः लघुतमो लघिष्ठः तिङश्च ति
ङन्तादतिशये द्योत्ये तमप् स्यात् तरप्तमपौ घः किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे किमजाप्यतदं
ताद्घादाम्वप्रत्ययान्तादाम् स्यात् न तु द्रव्यप्रकर्षे किंतमां प्राह्णेतमां पचतितमां उच्चैः
तमां तः द्विवचनविभज्योपपदे तरबीयसुनौ द्वयोरेकस्य निर्धारणे विभक्तव्ये चोपपदे स्मिंतडं·
तदेतौ स्तः पूर्वयोरपवादः अयमनयोरतिशयेन लघुः लघुतरः लघीयान् उदीच्याः प्राच्येभ्यः
पटुतराः पटीयांसः प्रशस्यस्य श्रः प्रकृत्यैकाच् इष्ठादावेकाच् प्रकृत्या स्यात्

ल॰ कौ॰ ५२ 52

श्रेष्ठः श्रेयान् ज्य च प्रशस्यस्य ज्यादेशः इष्ठेयसोः ज्येष्ठः ज्यादादीयसः आदेः परस्य ज्यायान् बहो
र्लोपो भू च बहोः बहोः परयोः इमेयसोः लोपः स्यात् बहोश्च भूरादेशः भूमा इष्ठस्य यिट् च बहो
परस्य इष्ठस्य लोपः स्यात् यिडागमश्च भूयिष्ठः विन्मतोर्लुक् इष्ठेयसोः अतिशयेन स्रग्वी स्र
जिष्ठः स्रजीयान् अतिशयेन त्वग्वान् त्वचिष्ठः ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ईषदू
नो विद्वान् विद्वत्कल्पः विद्वद्देश्यः विद्वद्देशीयः पचतिकल्पं विभाषा सुपो बहुच् पुरस्तात्तु ई
षदूनः पटुः बहुपटुः पटुकल्पः सुपः किं पचतिकल्पं प्रागिवात्कः इवे प्रतिकृतावित्यतः
प्राग्धिकारः अव्ययसर्वनाम्नामकच् प्राक् टेः कापवादः अव्ययानेकस्याप्यश्वोऽश्वकः उच्चकैः
नीचकैः सर्वके कुत्सिते कुत्सितोऽश्वोऽश्वकः किंयत्तदो निर्धारणे द्वयोः एकस्य डतरच् अन
योः कतरो वैष्णवः यतरः ततरः वा बहूनां जातिपरिप्रश्ने डतमच् बहूनां मध्ये निर्धारणे ड
तमच् वा स्यात् जातिपरिप्रश्न इति प्रत्याख्यानमाकरे कतमो भवतां कठः यतमः ततमः
वाग्रहणमकजर्थं यकः सकः इति प्राग्दिवीयाः इवे प्रतिकृतौ कन् स्यात् अश्व इव प्रतिकृति
रश्वकः सर्वप्रातिपदिकेभ्यः स्वार्थे कन् अश्वकः तत्प्रकृतवचने मयट् प्राचुर्येण प्रस्तुतं प्रकृतं
तस्य वचनं प्रतिपादनं भावेऽधिकरणे ल्युट् आद्ये प्रकृतमन्नं अन्नमयं अपूपमयं द्वितीये त्वन्न
मयो यज्ञः अपूपमयं पर्व प्रज्ञादिभ्यश्चाण् स्यात् प्राज्ञ एव प्राज्ञः दैवतः बांधवः बहुल्पार्था

छस्कारककाद्न्यतरस्याम् बहूनिददातिबहुशः अल्पशः आद्यादिभ्यस्तसेरुपसंख्यानं आदौ
आदितः मध्यतः अन्ततः पृष्ठतः पार्श्वतः आकृतिगणोयं स्वरेणस्वरतोवर्णतः कृद्वृत्तियोगे
संपद्यकर्तरिच्विः अभूततद्भावइतिवक्तव्यं विकारात्मतांप्राप्नुवत्यांप्रकृतौवर्तमानाद्विकार
शब्दात्स्वार्थेच्विर्वास्यात्करोत्यादिभिर्योगे अस्यच्वौवर्णस्येत्स्यात् च्वौ अकृष्णः कृष्णः सं
पद्यतेतंकरोति कृष्णीकरोतिब्रह्मीकरोति गंगीभवति अव्ययस्यच्वावीत्वंनेतिवाच्यं दोषाभू
तमहः दिवाभूतारात्रिः विभाषासातिकार्त्स्न्ये च्विविषयेसातिर्वास्यात्साकल्ये सात्पदादेः
सस्यषत्वंन दधिसिंचति कृत्स्नंशस्त्रमग्निः संपद्यतेअग्निसाद्भवति च्वौच दीर्घःस्यात् अग्नी
भवति अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौडाच् द्व्यजवरंन्यूनं नतुततोन्यूनंअनेकाजितियावत्
तं नार्धमवर्धंयस्य तस्मात्डाच्स्यात् कृभ्वस्तिभिर्योगे डाचिबहुलंद्वेभवतइतिडाचिविवक्षि
तेद्वित्वं डाचिविवक्षितइतिपरसप्तमीत्वात्प्रागेवद्वित्वंस्यात् डाचिकृतेद्वित्वेसतिद्व्यजवराद्वित्वा
तस्यांचसत्यांडाजितिवाभावः नित्यमाम्रेडितेडाचीतिवक्तव्यं डाज्परंयदाम्रेडितंतस्मिंपरे
पूर्वपरयोर्वर्णयोः पररूपंस्यात् इतितकारपकारयोः पकारः पटपटाकरोति अव्यक्तानुकर
णात्किं ईषत्करोति द्व्यजवराद्धात्किं श्रत्करोति अवरोतिकिं खरटखरटाकरोति अनितौकिं
पटिति करोति इतिडाचः ॥ अथस्त्रीप्रत्ययः ॥ अजाद्यतष्टाप् अजादीनामकारान्तस्य

ले॰ वाच्यंपत्नीत्वंस्यात्तत्रयोगेत्वमस्यात् अजा एडका अश्वा चटका मूषिका बाला वत्सा होढा
कौ॰ मन्दा विलाता मेधा इत्यादि गंगा सर्वा ऋन्नेभ्यः कर्त्रीदण्डिनी उगितश्च उगिदन्तात्स्यात्प्रातिपदि
५३ कात् ङीप् भवती पचन्ती उगिदचामितिसूत्रेचग्रहणेनधातोश्चेदुगित्कार्यंतर्ह्यञ्चतेरेव नेतेरन्न
53 अवास्त्रत् पाणिधृत् अञ्चेरस्मादेव प्राची प्रतीची टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वर
पः अनुपसर्जनंयत्त् टिदादितदन्तंयत्यदन्ततोऽङीप् कुरुचरी नदट् नदी देवट् देवी सौपर्णे
यी ऐन्द्री औत्सी ऊरुद्वयसी ऊरुदघ्नी ऊरुमात्री पंचतयी आक्षिकी लावणिकी यादृशी इत्वरी
नञ् स्नञ् कक् ख्युंस्तरुणतलुनानाव स्त्रैणी पौंस्नी शाक्तीकी आढ्यंकरणी तरुणी त
लुनी यञश्च यञन्तात् ङीप् अकारलोपेकृते हलस्तद्धितस्य हलःपरस्यतद्धितयकारस्य लो
पइतिपरे गार्गी प्राचांष्फतद्धितः यञन्तात्ष्फोवास्यात् सचतद्धितः षिद्गौरादिभ्यश्च ङीष्
स्यात् गार्ग्यायणी नर्तकी गौरी अनडुही अनड्वाही आकृतिगणोऽयं वयसिप्रथमे प्रथमव
योवाचिनोऽदन्तात्ङीप् कुमारी द्विगोः अदन्ताद्द्विगोर्ङीप् त्रिलोकी अजादित्वात् त्रिफला अने॰
का वर्णादनुदात्तात्तोपधात्तोनः अदन्तादनुपसर्जनाद्वाङीप् तकारस्यनस्य एता एनीरोहिता रोहि
णी वोतोगुणवचनात् उदन्ताद्गुणवाचिनोवाङीप् मृद्वी मृदुः बह्वादिभ्यश्च वाङीप् बह्वी
बहुः कृदिकारादक्तिनः रात्रिः रात्री सर्वतोऽक्तिन्नर्थादित्येके शकटिः शकटी पुंयोगादा॰

दाख्यायां यापुमाख्या पुंयोगात् स्त्रियां वर्त्तते तेन ततो ङीष् गोपस्य स्त्री गोपी पालकान्तान्न गो
पालिका अश्वपालिका प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः प्रत्ययस्थात्कात्पूर्वस्याकार
स्येकारः स्यात् आपि स चेदापः सुपः परो न चेत् सर्विका कारिका अतः किं नौका प्रत्ययस्थात्किं
शक्नोतीति शका असुपः किं बहुपरिव्राजका नगरी सूर्याद्देवतायां चाप् सूर्यस्य स्त्री देवता
सूर्या देवतायां किं सूर्यागस्त्ययोश्छे च ङ्यां च यलोपः सूरी कुन्ती इन्द्रवरुणभवशर्वरुद्रमृड
हिमारण्ययवयवन मातुलाचार्याणामानुक् ङीष् च इन्द्रस्य स्त्री इन्द्राणी वरुणानी भ
वानी शर्वाणी रुद्राणी मृडानी हिमारण्ययोर्महत्त्वे महद्धिमं हिमानी महदरण्यमर
ण्यानी यवाद्दोषे दुष्टो यवो दुष्टयवो यवानी यवनाल्लिप्यां यवनानां लिपिः यवनानी
मातुलोपाध्याययोरानुग्वा मातुलानी मातुली उपाध्यायानी उपाध्यायी आचार्याद्
णत्वं च आचार्यानी आर्यक्षत्रियाभ्यां वा स्वार्थे आर्याणी आर्या क्षत्रियाणी क्षत्रिया क्री
तात्करणपूर्वात् ङीष् वस्त्रक्रीती क्वचिन्न धनक्रीता स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्
असंयोगोपधं उपसर्जनं यत्स्वाङ्गं तदन्तात् ङीष् वा केशानतिक्रान्ता अतिकेशी अतिकेशा
चन्द्रमुखी चन्द्रमुखा संयोगोपधात्तु सुगुल्फा उपसर्जनात्किं शिखा नक्रोडादिबह्व
चः क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष् कल्याणक्रोडा आकृतिगणोऽयं सुजघना नखमुखात्संज्ञा

ल॰ यां न ङीप् पूर्वपदात्संज्ञायामगः पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु
कौ॰ गकारव्यवधाने शूर्पणखा गौरमुखा संज्ञायां किं ताम्रमुखी कन्या जातेरस्त्रीविषयाद
योपधात् जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततो ङीष् तटी वृषली कठी बह्वृची
५४ जातेः किं मुण्डा अस्त्रीविषयात्किं बलाका अयोपधात्किं क्षत्रिया योपधप्रतिषेधे ग
वयहयमुकयमत्स्यमनुष्याणामप्रतिषेधः गवयी हयी मुकयी हलस्तद्धितस्येति यलो
54 पः मनुषी मत्स्यस्य ङ्यां लोपः मत्सी इतो मनुष्यजातेः ङीष् स्यात् दाक्षी ऊङुतः उका
रान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् अयोपधात्किं अध्वर्युः ब्राह्मणी पङ्गोश्च
पङ्गूः श्वशुरस्योकाराकारलोपश्च श्वश्रूः ऊरूत्तरपदादौपम्ये उपमानवाचिपूर्वपदमूरू
त्तरपदं यत्प्रातिपदिकं तस्मादूङ् करभोरूः संहितशफलक्षणवामादेश्च अनौपम्यार्थं सू
त्रं संहितोरूः शफोरूः लक्षणोरूः वामोरूः शार्ङ्गरवाद्यञो ङीन् शार्ङ्गरवादेरञो
कारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात् शार्ङ्गरवी ब्राह्मणी बैदी नृनरयोर्वृद्धिश्च नारी यू
नस्तिः युवन्शब्दात्स्त्रियां तिः स्यात् युवतिः । इति स्त्रीप्रत्ययाः । सिद्धान्तकौमुदीशङ्कौ
स्तुभाभोस्मोगतः चक्रे वरदराजः श्रीमल्लघुसिद्धान्तकौमुदीम् ॥ इति
वरदराजकृतं लघुसिद्धान्तकौमुदीसमाप्तमिदं ॥ ॥

१५००

१८००